No. ४५९५

Title आचार संग्रह

Author हरिहर नारायण पुत्र

Extent ४१ पत्राणि Age सं० १७४०

Subject धर्मशास्त्रम्

𑆱𑇀𑆮𑆳𑆖𑆳𑆫𑆱𑆁𑆓𑇀𑆫𑆲𑆂

𑇔𑇕𑇙𑇕

4595

F. = 45

श्रीग

स्वस्तिश्रीमद्व्यावहारिकनारायणात्मजहरिहर
कृताह्निकपत्राणिपंचचत्वारिंशत् ॥ ४५॥

ॐ नमो नारायणाय ॥ श्री रामाय नमः ॥
श्री गणेशाय नमः ॥ श्री गुरुभ्यो नमः ॥

पाठक वैद्यनाथ पुस्तक इदं पुस्तकं पत्राणि ४५
[illegible]
[illegible]

१

श्रीगणेशाय नमः ॥ भवानीशौ नमस्कृत्य स्मृतीः सं
वीक्ष्य सर्वतः ॥ बालानामवबोधाय करोम्याचारसंग्र
हं ॥१॥ दानमाचमनं होमं भोजनं देवतार्चनं ॥ प्रौढ
पादो न कुर्वीत स्वाध्याये पितृतर्पणं ॥२॥ आसनारूढ
पादो वा जान्वोर्वा जंघयोस्तथा ॥ कृतावसक्थिकायः
स्तु प्रौढपादः स उच्यते ॥३॥ इक्षूनपः फलं मूलं तांबू
लं पयऔषधं ॥ भक्षयित्वापि कर्त्तव्याः स्नानसंध्या ॥१॥
दिकाः क्रियाः ॥४॥ ब्राह्मे मुहूर्त्ते तु बुध्येत धर्मार्थाननु

चिंतयेत्॥ फायद्भेशां श्चतन्मूलान्वेदतत्वार्थमेवचा॥५॥
अथस्मरणीयाणि॥ महर्षि र्भगवान्व्यासः कृत्वेमां
संहितांपुरा॥ श्लोकैश्चतुर्भि र्धर्मात्मापुत्रमध्यापयेच्छु
कं॥६॥ मातापितृसहस्राणिपुत्रदारशतानिच॥ संसा
रेष्वनुभूतानियांतियास्यंतिचापरे॥७॥ हर्षस्थानस
हस्राणिभयस्थानशतानिच॥ दिवसेदिवसेमूढमा
विशंतिनपंडितं॥८॥ ऊर्ध्वबाहुर्विरौम्येषनचकश्चि
च्छृणोतिमे॥ धर्मादर्थश्चकामश्चसकिमर्थंनसेव्यते॥९॥

२

न१

नजातुकामान्नभयान्नलोभाद्धर्मंत्यजेज्जीवितस्यापि
हेतोः॥ धर्मोनित्यःसुखदुःखेत्वनित्येजीवोनित्योहेतु
रस्यत्वनित्यः॥१॥ इमांभारतसावित्रींप्रातरुत्थाय
यःपठेत्॥ सभारतफलंप्राप्यपरंब्रह्माधिगच्छति॥११॥
प्रातःस्मराम्यादिविष्णुगणसूर्यदुर्गाशिवानांचत्वा
रश्चत्वारःश्लोकाःपठनीयाः॥प्रातःस्मरामिभवभीतिम
हार्तिशांत्यैनारायणंगरुडवाहनमब्जनाभं ग्राहाभिभूतवरवा
रणमुक्तिहेतुंचक्रायुधंतरुणवारिजपत्रनेत्रं॥ प्रातर्नमा ॥२॥
मिमनसावचसाचमूर्ध्ना पादारविंदयुगलंपरमस्यपुंसः

नारायणस्यनरवार्णवतारणस्यपारायणप्रवणविप्र
परायणस्य।प्रातर्भजामिभजनामनयेकरंतंप्राक्सर्वजन्मकृत
पापभयापहत्यै।योग्राहवक्त्रपतितांघ्रिगजेंद्रघोरशोकप्रणाशम
करोधृतशंखचक्रः।३।श्लोकत्रयमिदंपुण्यंप्रातःप्रातःपठेन्नरः।।लो
कत्रयगुरुस्तस्मैदद्यादात्मपदंहरिः।।४।।प्रातःस्मरामिगणनाथ
मनाथबंधुंसिंदूरपूरपरिशोभितगंडयुग्मं।उद्दंडविघ्नपरिखं
डनचंडदंडमाखंडलादिसुरनायकवृंदवंद्यं।प्रातर्नमामिचतुरा
ननवंद्यमानमिच्छानुकूलमखिलंचवरंददानं।तंतुंदिलंद्विर
सनाधिपयज्ञसूत्रंपुत्रंविलासचतुरंशिवयोःशिवाय।।२।।
प्रातर्भजाम्यभयदंखलुभक्तशोकदावानलंगणविभुंवरकुंज
रास्यं।अज्ञानकाननविनाशनहव्यवाहमुत्साहवर्द्धनमहंसुतमी
श्वरस्य।श्लोकत्रयमिदंपुण्यंमहासाम्राज्यदायकं।प्रातरुत्थाय
सततंयःपठेत्प्रयतःपुमान्।[illegible]तस्सविघ्नवंदेयं

१२ रूपं हृदि मंडलमृचोथ तनुर्यजूंषि। सामानि यस्य किरणाः प्रभवा
३ दिहेतुं ब्रह्माहरात्मकमलक्ष्यमचिंत्यरूपं। प्रातर्नमामि तरणिं त
नुवाङ्मनोभिर्ब्रह्मेंद्रपूर्वकसुरैर्नतमर्चितं च। वृष्टिप्रमोचनवि
निग्रहहेतुभूतं त्रैलोक्यपालनपरं त्रिगुणात्मकं च। प्रातर्भजा
मि सवितारमनंतशक्तिं पापौघशत्रुभयरोगहरं परं च। तं सर्व
लोककलनात्मककालमूर्त्तिं गोकंठबंधनविमोचनमादिदेवं। वि
श्लोकत्रयमिदं भानोः प्रातः प्रातः पठेत्तु यः। सर्वव्याधिनिर्मु
क्तः परमं सुखमाप्नुयात्। प्रातः स्मरामि शरदिंदुकरोज्वलाभां
सद्रत्नवन्मकरकुंडलहारभूषां। दिव्यायुधोर्जितसुनीलसहस्र
हस्तां रक्तोत्पलाभचरणां भवतीं परेशां। प्रातर्नमामि महिषा
सुरचंडमुंडशुंभासुरप्रमुखदैत्यविनाशदक्षां। ब्रह्मेंद्ररुद्रमुनिमो
हनशीललीलां चंडीं समस्तसुरमूर्त्तिमनेकरूपां। प्रातर्भजामि भ
जतामभिलाषदात्रीं धात्रीं समस्तजगतां दुरितापहंत्रीं। संसा ॥२॥
रबंधनविमोचनहेतुभूतां मायां परां समधिगम्य परस्य विष्णोः। ॥३॥

२ शोध्याप २

श्लोकत्रयमिदं देव्याश्चंडिकायाः पठेन्नरः। सर्वान्कामानवाप्नोति प्रेत्य
१ शि। लोके महीयते॥ प्रातः स्मरामि भवभीतिहरं सुरेशं गंगाधरं वृ
षभवाहनमंबिकेशं। खट्वांगशूलवरदाभयहस्तमीशं संसाररो
गहरमौषधमद्वितीयं॥ प्रातर्नमामि गिरिशं गिरिजार्द्धदेहं स
र्गस्थितिप्रलयकारणमादिदेवं। विश्वेश्वरं विजितविश्वमनोभि
रामं संसाररोगहरमौषधमद्वितीयं॥ प्रातर्भजामि शिवमेकमनं
तमाद्यं वेदांतवेद्यमनघं पुरुषं महांतं। नामादिभेदरहितं षड्भा
वशून्यं संसाररोगहरमौषधमद्वितीयं॥ प्रातः समुत्थाय शिवं वि
चिंत्य श्लोकत्रयं येनुदिनं पठंति। ते दुःखजातं बहुजन्मसंचितं हि
त्वा पदं यांति तदेव शंभोः॥ ब्रह्मा मुरारिस्त्रिपुरांतकारिर्भानुः श
शी भूमिसुतो बुधश्च। गुरुश्च शुक्रः शनिराहुकेतवः कुर्वंतु सर्वे मम
सुप्रभातं॥ भृगुर्वसिष्ठः क्रतुरंगिराश्च मनुः पुलस्त्यः पुलहश्च गौतमः।
रैभ्यो मरीचिश्च्यवनश्च दक्षः कुं॰तं॥ सनत्कुमारः सनकः सनंदनः सना
तनोप्यासुरिपिंगलौ च। सप्त स्वराः सप्त रसातलानि कुं॰तं॥ सप्ता

।।४।। ले वाः सप्त ऊसाः यजोश्च सप्तर्षि र्याहैः दवनानि यमका शर्वदिसत्ता
कुर्वनानि सम सुप्र० पृथ्वी सगंधा सरसास्तथापः स्पर्शी च वायुर्ज्वलि
तं च तेजः नभः सशब्दं महता सहैव कु० इत्थं प्रभाते परमं पवित्रं पठे
स्मरेद्वा शृणुयाच्च तद्वत् दुःस्वप्ननाशस्त्विह सुप्रभातं न वेद्मि नित्यं भग
वत्प्रसादात्। पुण्यश्लोको नलो राजा पुण्यश्लोको जनार्दनः पुण्यश्लोको
च वैदेही पुण्यश्लोको युधिष्ठिरः। अश्वत्थामा बलिर्व्यासो हनूमांश्च वि
भीषणः कृपः परशुरामश्च सप्तैते चिरंजीविनः। सप्तैतान् संस्मरेन्नित्यं
मार्कंडेयमथाष्टमं। जीवेद्वर्षशतं सोपि सर्वव्याधिविवर्जितः। अहल्या
द्रौपदी सीता तारा मंदोदरी तथा पंचकन्या स्मरेन्नित्यं मानहान्यपनबाध
ते। मदनपारिजाते चांद्रे श्रविमुक्तचरणभुणलं दलिणभूते खअंकुरस्त
थं। स्मरणमपि वाराणस्या नित्य तिः स्वप्नमपश्यन्नचोऽप्रयोगपारि
जाते प्रार्थना। मधुकरवसने देवि पर्वतस्तनमंडले। विष्णुपत्नि नम
स्तेस्तु पादस्पर्शं क्षमस्व मे। कात्यायनः। श्रोत्रियं सुभगं गां च अग्निमग्नि
चितिं तथा। प्रातरुच्छायय यः पश्येदापद्भ्यः स प्रमुच्यते। रोचनां चंदनं गंधार
मृदंगं दर्पणं मणिं। गुरुमग्निं रविं पश्येन्न पश्येत्प्रातरेव हि। पापिष्ठं दुर्भ ।।४।।
गं मांधं नग्नमुत्कृत्तनासिकं। प्रातरुत्थाय यः पश्येत्तत्कलेरुपलक्षणं॥

नग्नं बालकं व्यातारं को यतन्नासि मेह। इति प्रबोधावधिः।

२ प्रा॰ पंचिका २ ।।५।।

ततोवामनपुराणोक्तब्रह्मामुरारिरित्यादि॥उत्तायपश्चिमेरा
त्रेस्तत आचम्यचोदकं॥अंतर्द्धायतृणैर्भूमिंशिरःप्रावृत्यवा
ससा॥कुर्यान्मूत्रपुरीषेतुशुचौदेशेसमाहितः॥नैऋत्यामि
षुविक्षेपमतीत्याभ्यधिकंभुवः॥१२॥प्रत्यङ्मुखस्तुपूर्वाह्णे
पराह्णेप्राङ्मुखस्तथा॥उदङ्मुखस्तुमध्याह्नेनिशायांदक्षि
णामुखः॥१३॥छायायामंधकारेचरात्रौवौद्विजः॥यथासुख इतिवा५
मुखः कुर्यात्प्राणबाधाभयेषुच॥१४॥उच्चारेमैथुनेचैवप्रस्रावे
दंतधावने॥श्राद्धेभोजनकालेचषट्सुमौनंसमाचरेत्॥१५॥
गृहीत्वाजलपात्रंतुविण्मूत्रंकुरुतेयदि॥तज्जलंमूत्रसदृशं
पीत्वाचांद्रायणंचरेत्॥१६॥मलमूत्रंत्यजेद्विप्रोविस्मृत्येवौ

पवीतधृक्॥ उपवीतंतु सूत्र्यग्रह्याद्न्यन्नवंतदा॥१७॥ अथा
पकृष्य विण्मूत्रं लोष्ठकाष्ठतृणादिना॥ उद्धृत्तवासा उत्तिष्ठेद्
दृढं विधृतमेहनः॥१८॥ द्वे लिंगे मृत्तिके देये गुदे पंच करे दश॥
उभयोः सप्त दातव्याः तिस्रस्तिस्रस्तु पादयोः॥१९॥ एका लिं
गे करे तिस्र उभयोर्मृत्तिकाद्वयं॥ मूत्रशौचे समाख्यातं शुक्रे
तु द्विगुणं भवेत्॥२०॥ त्रिगुणं मैथुने प्रोक्तं गृहस्थानां सदैव
तु॥ द्विगुणं स्याद्वनस्थानां यतीनां त्रिगुणं भवेत्॥२१॥ चतु
र्गुणं यतीनामित्येवं स्त्रीशूद्रयोरर्द्धमानं शौचं प्रोक्तं मनीषि
भिः॥ दिवा शौचस्य निश्यर्द्धं पथिपादो विधीयते॥२२॥ धा
रा शौचं न कर्तव्यं शौचशुद्धिमभीप्सुना॥ चुलुकेनैव कर्तव्यं

हस्तशुद्धिविधानतः॥२३॥शौचे यत्नः सदा कार्यः शौचमूलो य
तो द्विजः॥शौचाचारविहीनस्य समस्ता निःफलाः क्रियाः॥२४॥
अथाचमनं॥स्नात्वा पीत्वा क्षुते सुप्ते भुंक्ते रथ्योपसर्पणे॥आ
चांतः पुनराचामेद्वासो विपरिधाय च॥२५॥रेतोमूत्रपुरीषा
णामुत्सर्गेनृतभाषणे॥ष्ठी॥विद्याध्ययनारंभे कासश्वासाग
मे तथा॥२६॥चत्वरं वा श्मशानं वा समागम्य द्विजोत्तमः॥सं
ध्ययोरुभयोस्तद्वदाचांतोप्याचमेत्पुनः॥२७॥भोजने स्व
ने स्नाने उपहारे प्रतिग्रहे॥हविर्भक्षणकालेचतं द्विराचमनं त्
स्मृतं॥२८॥अथाचमनापवादः॥मुखजा विप्रुषो मेध्यातथा
चमनबिंदवः॥श्मश्रुचास्यगतं दंतसक्तं त्यक्त्वा विशुध्यति॥२९॥
तांबूले च फले चैव भुक्त्वा स्नेहावशिष्टके॥लोहैः पत्रैर्मूलै

॥६॥

५३

फलैस्तु एणकाष्ठमयैस्तथा॥२०॥स्तुगंधिभिस्तुथाद्रव्यैर्नोछि
ष्टस्तु भवेद्द्विजः॥प्राणाकुतीषुसत्रेषुमधुपर्केतथैवच॥२१॥
अथाचमनविधिः॥कृत्वाशौचंप्रक्षाल्यपादौहस्तौनुमृज्ज
लैः॥निबद्धशिखकछस्तु द्विजआचमनंचरेत॥२२॥सौवर्ण
रौप्यताम्रैस्तुवेणुबिल्वोरमचर्मभिः॥अलांबुदारूपात्रैस्तुना
लिकेरकपित्थकैः॥२३॥तृणकाष्टैर्जलाधारैरन्यांतरितमं
न्मयैः॥वामेनोद्धृत्यवाचामेदन्यदातुरसंभवे॥२४॥अं
तर्जानुशुचौदेशेउपविष्टउदङ्मुखः॥प्राग्वाब्राह्मेणतीर्थे
नद्विजोनित्यमुपस्पृशेत॥२५॥कनिष्ठादेशिन्यंगुष्ठमूलानी
न्यग्रंकरस्यच॥प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात
॥२६॥उभयत्रस्थितैर्दर्भैःसमाचमेतियोद्विजः॥सोमपा ॥६॥

नफलंसोपिभुक्तायज्ञफलंलभेत्॥३७॥वामहस्तेकुशान्कृत्वा
समाचमतियोद्विजः॥उपस्पृष्टंभवेत्तेनरुधिरेणमलेनवा॥३८॥
जान्वोरूर्ध्वंजलेतिष्ठन्नाचांतः शुचितामियात्॥आर्द्रवासाज
लेकुर्यात्तर्पणाचमनंजपं॥३९॥शुष्कवासास्थलेकुर्यात्तर्पणा
चमनंजपं॥विवर्णंगंधवत्तोयंफेनिलंचविवर्जयेत्॥४०॥सोपा
नत्कोजलस्थोवामुक्तकेशोथवापुनः॥उष्णीषीवापिनाचा
मेद्वस्त्रेणावेष्ट्यवाशिरः॥४१॥संध्यार्थेभोजनार्थेवापित्र्यर्थेवा
तथैवच॥अनाहतेननाचामेज्जपादिहवनेषुच॥४२॥अपःक
रनखस्पृष्टाः समाचमतियोद्विजः॥सुरांपिबतिसुव्यक्तांयम
स्यवचनंयथा॥४३॥कंठंशिरोवाप्रावृत्यरथ्यापणगतोपिवा॥
अप्रक्षाल्यपादयोःशौचमाचांतोप्यशुचिर्भवेत्॥४४॥मंत्रेमेध्ये

पुरीषेचभोजनांतेतथैवच॥चतुरष्टद्विषट्द्व्यष्टगंडूषैंस्तुद्धिरि
ष्यते॥४५॥तावन्नोपस्पृशेद्विद्वान्यावद्वामेननस्पृशेत्॥त्रि
भिःपर्युक्षणंकुर्यात्पात्रेपरित्रिभिःसदा॥४६॥बिंदुंचनिक्षि
पेन्मध्येशेषंशुध्यतिबिंदुभिः॥हृत्कंठतालुगाभिस्तुयथासं
ख्यंद्विजातयः॥४७॥शुद्धेरन्स्त्रीचशूद्रश्चसकृत्स्पृष्टाभिरंत
तः॥केशवायेत्रिभिःपीत्वाद्वाभ्यांप्रक्षालनेत्करौ॥४८॥द्वाभ्या धे॰ १
मोष्ठौतुसंस्पृश्यद्वाभ्यामुन्मार्जनंतथा॥एकेनहस्तंप्रक्षा
ल्यपादावपितथैकतः॥४९॥संप्रोक्ष्यैकेनमूर्द्धानंततःसं
कर्षणादिभिः॥आस्यनासाक्षिकर्णांश्चनाभिवक्षःशि
रोंसकान्॥५०॥अंगुष्ठेनप्रदेशिन्याघ्राणंतत्रउपस्पृशेत्॥
=पंगुष्ठानामिकाभ्यांचचक्षुःश्रोत्रंपुनःपुनः॥५१॥कनिष्ठांगु ॥७॥

ष्ठयोर्नाभिहृदयंतुतलेनवै॥सर्वाभिस्तु शिरःपश्चाद्बाहूंचाग्रे
णसंस्पृशेत्॥ ५२॥ पाचमनाभावे॥ आर्द्रंतृणंच भूमिंचगोम
यंवाथसंस्पृशेत्॥ कुर्यात्तालंभनंवापिदक्षिणश्रावणस्प
वा॥५३॥ यःक्रियाःकुरुतेमोहादनाचम्यैवनास्तिकः॥ भवं
तीहिक्रियास्तस्य वृथासर्वानिसंशयः॥५४॥ पथदंतधाव
नं॥ मुखेपर्युषितेनित्यंभवत्यप्रयतोनरः॥ तदार्द्रकाष्ठंशुष्कं
वाभक्षयेद्दंतधावनं॥५५॥ तिन्तिणीवेणुष्ठश्च आम्रनिंबौ
तथैवच॥ अपामार्गश्चबिल्वश्च अर्कश्चोदुंबरस्तथा॥५६॥
बदरीतिंदुकास्त्वेतेप्रशस्तादंतधावने॥ कोविदारःकरंजश्च
कुटजःस्ननमालती॥५७॥ प्रक्षाल्यहस्तपादौचमुखंचसुसमा
हितः॥ दक्षिणंबाहुमुद्धृत्यकृत्वाजान्वंतरातततः॥५८॥ तिक्तंक

षायेचतथाकटुकंकंटकान्वितं॥ क्षीरिणोवृक्षगुल्मादेर्भक्षये
द्दंतधावनं॥५९॥ कंटकीक्षीरवृक्षोत्थंद्वादशांगुलमव्रणं॥ कनि
ष्ठिकाग्रवत्स्थूलंकूर्चाग्रंचसपर्वकं॥६०॥ सूक्ष्मंहीनदंतस्यस
मदंतस्यमध्यमं॥ स्थूलंविषमदंतस्यविविधंदंतधावनं॥६१॥ द्वाद
शांगुलिकंविप्रेकाष्ठमाहुर्मनीषिणः॥ शूद्रविट्क्षत्रजातीनांनव
षट्चतुरंगुलं॥६२॥ चतुरंगुलमानंतुनारीणांनात्रसंशयः॥ प्रा
५ ये तर्भुक्त्वातुयतवाग्भक्षयेद्दंतधावनं॥६३॥ दंतधावननिषेधकालाः।
चतुर्दश्यष्टमीनंदानवमीदर्शपूर्णिमाः॥ श्राद्धाहेजन्मदिवसेवि
8 वाहेसुखदुःखयोः॥६४॥ व्रतेचैवोपवासेचव्यतीपातेत्रिजन्म
सु॥ संक्रांतौदंतकाष्ठंतुनाद्यात्प्रोषितभर्तृका॥६५॥ नाद्याद
जीर्णवमथुश्वासकासज्वरार्दितः॥ पुरोदयाद्भवेत्स्वधान्नो ॥८॥

इतिस्तमितेरवौ ॥६५॥ द्वीक्षितो ब्रह्मचारी च यतिश्च विधवांग
ना ॥ नित्यमेषां दंतकाष्ठममायां तु विवर्जयेत् ॥ ६७॥ प्रथमे
दंतकाष्ठानां निषिद्धायां तिथौ तथा ॥ अपां द्वादशगंडूषैर्वि
दध्याद्दंतधावनं ॥ ६८॥ शान्यर्कशुक्रमध्याह्ने स्नानकाले कुजे
तथा ॥ निराशाः पितरो यांति यो भक्षेद्दंतधावनं ॥ ६९॥ रजस्व
लास्त्रतिकातु वर्जयेद्दंतधावनं ॥ रजस्वला चतुर्थे ह्निस्रुति
का दशमे हनि ॥ ७०॥ इष्टकालोष्टपाषाणैर्नरवैरंगुलिभिस्त
था ॥ मुक्त्वा चानामिकांगुष्ठे वर्जयेद्दंतधावनं ॥ ७१॥ दक्षिणा
भिमुखो नाद्यान्नीलं धववर्कं दबकं ॥ तिंदुकेंगुदबंधूकमोचा
करजसिद्धकं ॥ ७२॥ कार्पासं दंतकाष्ठं च विभीतरपि श्रेयं ह
रेत् ॥ नार्द्रं उं न त्वचाहीनं नाप्रशस्ततरूद्भवं ॥ ७३॥ स्नुहिविं

शुकशाल्मलीकरंजादींश्चवर्जयेत्॥ कोविदारं पारिभद्रं
श्यामाकं पिच्छिलं तथा॥ अज्ञातपूर्वाणि न दंतकाष्ठान्न
द्यान्न पर्णैश्च समान्वितानि॥ न युग्मपर्णानि न पाटिता
नि न चोर्ध्वशुष्काणि विना त्वचा वा॥७५॥ दंतधावनमंगुल्या
प्रत्यक्षं लवणं तथा॥ मृत्तिकाभक्षणं चापि तुल्यं गोमांस
भक्षणं॥७६॥ अंगारवालुकापर्णतृणवस्त्रनखादिभिः॥
न कुर्याद्दंतकाष्ठं च श्रीकामी दूषिते दिने॥७७॥ प्रक्षाल्य
भक्षयेत्काष्ठं प्रक्षाल्यैव तु संत्यजेत्॥ आयुरित्यादिमं
त्रोयमुक्तः शाखाभिमंत्रणे॥७८॥ आयुर्बलं यशो वर्चः
प्रजां पशून्वसूनि च॥ ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि ॥९॥
वनस्पते॥७९॥ पश्चाद्वा दशगंडूषैः [illegible]द्ध्या दंतधावनं॥

स्मरेचोंकारंचगायत्रीं निबध्नीयाच्छिखांततः॥८०॥पति
तांत्यजपारवंडीदेवाजीवरजस्वलाः॥भिषक्कूपातकि
चं आलानप्रेक्ष्यादंतधावने॥८१॥शुनकंविड्वराहंचछु
त्राकंग्रामकुक्कुटं॥अन्यान्नैवेदृशान्पश्येद्दिजःशुद्धोवि
चक्षणः॥८२॥इतिदंतधावनविधिं॥कुशैःपूतंभवेत्कु
शैनापउपस्पृशेद्द्विजः॥कुशेनचोद्धृतंतोयंसोमपानेन
संमितं॥८३॥कुशाःकाशास्तथादूर्वायवाव्रीहयएव
च॥कुशजाःपुंडरीकाणिसप्तधावैदर्भइत्युच्यते॥८४॥मा
सेनस्यैमावास्यातस्यांदर्भोच्चयोमतः॥अयातया
मास्तेदर्भा-वि।नियोज्याःपुनःपुनः॥८५॥मासिमास्य
हृतादर्भास्तत्तन्मास्येवचोदिताः॥शुचिर्भूत्वाशुचौ

स्नान ५

देशस्थित्वा पर्यतिरामुखः ॥८६॥ ॐकारेणैव मंत्रेण कुशान्स्पृ
[smudged]ष्ट्वा द्विजोत्तम ॥ विरं विनासहोत्पंन परमेष्ठी निसर्गज
रो भव ॥८७॥ हूंफट्कारेण दर्भास्तु सस्त्रष्ठित्वा समुद्धरेत् ॥८८॥
अनंतर्गर्भिणं साग्रं कौशं द्विदलमेव च ॥ प्रादेशमात्रं वि
ज्ञेयं पवित्रं यत्र कुत्रचित् ॥८९॥ ब्रह्मयज्ञे जपे चैव ब्रह्मग्रं
थिर्विधीयते ॥ भोजने वर्तुलः प्रोक्त एवं धर्मो न हीयते ॥९०॥
अन्यान्यपि पवित्राणि कुशदूर्वामयानि च ॥ हेमात्मकप
वित्रस्य कलां नार्हन्ति षोडशीं ॥९१॥ हेमरत्नं सर्वदा स्वं कु
र्याद्देवा विचारयन् ॥ रौप्यं दक्षप्रदेशिन्यां बिभृयाद्धीमि
तो द्विजः ॥९२॥ अनामिकाधृतं हेमं तर्जन्यां रूप्यमेव च ॥
कनिधाधृतं खड्गं तेन पूतो भवेन्नरः ॥९३॥ पादुके चोत्त ॥१०॥
ष्ठि

10

रीयेचतज्जन्यांरूप्यधारणं॥नजीवत्पितृकः कुर्याज्ज्येष्ठे भ्रा
तरिजीवति॥२४॥नानामन्त्रैस्सुवर्णानानर्कषोडशरवडुभिः॥
कृतात्रिशाक्कि मुद्रेयंतीव्रदारिद्र्यनाशिनी॥२५॥अथस्नानं॥
अपस्नातोनाचरेत्कर्मजपहोमादिकिंचन॥लालास्वेदस
माकीर्णशायनादुत्थितः पुमान्॥२६॥स्रवंति हिसुषुप्तस्य
इंद्रियाणिस्रवंतिच॥अंगानिसमतांयांतिचोत्तमानाध
मैःसह॥२७॥अत्यंतमलिनःकायोनवछिद्रसमन्वितः॥
स्रवत्येवदिवारात्रौप्रातःस्नानंविशोधनं॥२८॥गुणादश
स्नानपरस्यसाधोरूपंचतेजश्चबलंशौचं॥आयुष्यमारो
ग्यमलोलुपत्वंदुःस्वप्ननाशश्चयशश्चमेधाः॥२९॥स्नानंनदी
देवखातह्रदेषुचसरस्सुच॥पंचपिंडाननुद्धृत्यनस्नायात्

परियारिणि ॥१००॥ भ्रामिष्ठमुह्यतं वापि शीनमुष्णमथापि
वा ॥ गांगं पयः पुनात्याशु पापमामरणांतिकं ॥१०१॥ स्नात्वा
चांतो वारिमध्ये त्रिः पठेदघमर्षणं ॥ संकल्प्य पूर्वकं स्नात्वा
त्रिराचम्याथ तर्पणं ॥१०२॥ यज्ञोपवीती देवानां नीवीती ऋ
षितर्पणे ॥ प्राचीनावीती पित्र्ये तु स्वेन तीर्थेन भाविनः ॥१०३॥
द्वौ हस्तौ युग्मतः कृत्वा पूरयेदुदकांजलिं ॥ गोशृंगमात्र मुधृ
त्य जलमध्ये जलं क्षिपेत् ॥१०४॥ जलांजलित्रयं दद्याद्द्वेचा
न्ये संस्कृता भुवि ॥ असंस्कृतामीतां नामेकमेव तटे क्षिपे
त् ॥१०५॥ यन्मया दूषितं तोयं शरीरमलसंभवात् ॥ तद्दो
२२ षपरिहार्थं यक्ष्माणं तर्पयाम्यहं ॥१०६॥ अग्निदग्धाश्च
येजीवा येप्यग्निदग्धाः कुले मम ॥ भूमौ दत्तेन तोयेन ॥११॥

न१

तृप्तायांतु परांगतिं॥१०७॥ विकिरे पिंडदाने च तर्पणे स्नान
कर्मणि॥ आचांतः सन्न कुर्वीत दर्भसंत्यजनं बुधः॥१०८॥
स्नातः शिरो नावधुनेन्नांगेभ्यस्तोयमुद्धरेत्॥ न च पूर्वधृतं
वासो न च तैलमुपस्पृशेत्॥१०९॥ स्नात्वा न धावयेद्वस्त्रं नम
ज्याद्वाससा मुखं॥ न च निर्धुनुयात्केशान्वाससश्चैव नानि
धुनेत्॥११०॥ उत्तीर्य पीठये द्वस्त्रं परिधाय च वाससी॥
स्वयं धौतेन कर्त्तव्या क्रिया धर्मा विपाश्चिता॥ न तु नेजक
धौतेन नाहतेन न कुत्रचित्॥१११॥ स कृद्धौतं नवं श्वेतं सद
शं यत्र धारितं॥ अहतं तं विजानीयाद्दैवे पित्र्ये च पावनी॥
११२॥ ब्राह्मणस्य सितं वस्त्रं नृपते रक्तमुल्वणं॥ पीतं वैश्य
स्य शूद्रस्य नीलं मलवदिष्यते॥११३॥ विकच्छो नुत्तरीयश्च

१२

नग्नश्चार्द्रवस्त्र एव च ॥ श्रौतं स्मार्तं तथा कर्म न नग्नश्चिंतयेद
पि ॥ ११४ ॥ नग्नः स्यान्मलवद्वासा नग्नः कौशेयकेवलः ॥
नग्नो द्विगुणवस्त्रः स्यान्नग्नो दग्धपटस्तथा ॥ ११५ ॥ नग्न
न४ श्च स्यूतवस्त्रः स्यान्नग्नो ग्रथितवस्त्रकः ॥ नग्नश्च बहुवस्त्र
स्यान्नग्नः कौपीनकेवलः ॥ ११६ ॥ काषायवस्त्रः साक्षाच्च
दश नग्नाः प्रकीर्तिताः ॥ स्नानं कृत्वार्द्रवस्त्रं तु ऊर्ध्वमुत्तार
येद्द्विजः ॥ ११७ ॥ उपार्द्रवस्त्रमधस्ताच्चेत्पुनः स्नानेन शुध्य
ति ॥ नैकवस्त्रः प्रवर्तेत जपसंध्यादिकर्मणि ॥ ११८ ॥ नि
ष्पीडितं धौतवस्त्रं यदा स्कंधे विनिक्षिपेत् ॥ तदासुरं भ
वेत्कर्म पुनः स्नानं विशोधनं ॥ ११९ ॥ वस्त्रं चतुर्गुणीकृत्य ॥१२॥
निष्पीड्य सदशं तथा ॥ वामप्रकोष्ठे निक्षिप्य स्कंधे न स्कं

12

स्य द्विराचमेत् ॥१२०॥ अनामैर्धौत वस्त्रस्य स्पर्शात् तस्मो मा विकुंतथा ।
कुतपं योगपट्टं च विवासास्तु न वै तं ॥१२१॥ यज्ञोपवीतं द्वे धार्ये श्रौ
ते स्मार्ते च कर्मणि ॥ तृतीयमुत्तरीयार्थं वस्त्राभावे तदिष्यते ॥
१२२॥ ये वास्माकं कुले जाता अपुत्रा गोत्रिणो मृताः ॥ ते गृ ह्णंतु
मया दत्तं वस्त्र निःपीडनोदकं ॥१२३॥ मनुः ॥ निष्पीड्य स्नान
वस्त्रं तु पश्चात्संध्यां समाचरेत् ॥ अन्यथा कुरुते यस्तु स्ना
नं तस्य वृथा भवेत् ॥१२४॥ ब्रह्म क्षत्रविशां चैव मंत्रवत्स्नान
मिष्यते ॥ तूष्णीमेव हि शूद्रस्य स्त्रीणां च कुरुनंदन ॥१२५॥ प्रा
तर्मध्याह्नयोः स्नानं वानप्रस्थ गृहस्थयोः ॥ यतस्त्रिषवणं प्रोक्तं
सकृत्तु ब्रह्मचारिणः ॥१२६॥ इति नित्यस्नानं ॥ अथ काम्यस्ना
नं ॥ पुष्ये च जन्मनक्षत्रे व्यतीपाते च वैधृते ॥ अमावास्यां

नदीस्नानं पुनात्यासप्तसंकुलं ॥२७॥ चैत्रशुक्लचतुर्दश्यां यः
स्नायाच्छिवसंन्निधौ ॥ नप्रेतत्वमवाप्नोति गंगायांच विशे
षतः ॥२८॥ ज्येष्ठमासि सिते पक्षे दशम्यां हस्तसंयुते ॥ दश
जन्माघहा गंगा तेन पापहरा स्मृता ॥२९॥ सूर्यग्रहणसा
तुल्या शुक्लमाघस्य सप्तमी ॥ अरुणोदयवेलायां नद्यां
स्नानं महाफलं ॥३०॥ पुनर्वसुबुधोपेता चैत्रमाससिताष्ट
मी ॥ स्रोतःसु विधिवत्स्नात्वा वाजपेयफलं लभेत् ॥३१॥
आषाढादिचतुर्मासं प्रातःस्नायी भवेन्नरः ॥ विप्रेभ्यो भो
जनं दत्वा कार्त्तिक्यां गोप्रदो भवेत् ॥३२॥ कार्त्तिकं सकलं
मासं नित्यस्नायी जितेंद्रियः ॥ जपन्हविष्यभुक्शान्तः स ॥१३॥
र्वपापैः प्रमुच्यते ॥३३॥ तुलामकरमेषेषु प्रातःस्नायी सदा

भवेत्॥ हविष्यं ब्रह्मचर्यं च महापातकनाशनं॥ ३४॥ श्रीकामः
सर्वदा स्नानं कुर्वीतामलके नरः॥ सप्तमीं नवमीं चैव सर्वकालं
विवर्जयेत्॥ ३५॥ बालाश्च तरुणा वृद्धा नरनारीनपुंसकाः स्ना
त्वा माघे शुभे तीर्थे प्राप्नुवन्तीप्सितं फलं॥ ३६॥ यथाश्व कछाया
स्नानं॥ यश्वत्थीयोदके स्नाया द्विजच्छायेति सोच्यते॥ अमागु
रु समायोगः सूर्यपर्वशताधिकं॥ ३७॥ गुरुवार्यमावास्याश्व
कछायां वारिणा॥ स्नानं प्रयागस्नानेन समं पातकनाशनं॥
३८॥ जीवो बृहस्पतिः सौरिराचार्यो गुरुरंगिराः॥ वाचस्पति
र्देवमंत्री शुभं कुर्यात्सदा मम॥ ३९॥ पक्षोपवासफलदा म
हानद्यः समुद्रगाः॥ मासोपवासफलदः सह्लः स्नातो महो
दधिः॥ ४०॥ समुद्रे पर्वसु स्नायाद्माघां तु विशेषतः॥ पापे

२९

र्विमुच्यतेसर्वैरमांतेस्नानमाचरेत्॥४१॥भृगोभौमदिने स्नानंसमुद्रेचविवर्जयेत्॥ग्रहणेरविवारेचपुत्रेष्वुनैनदाचरेत॥४२॥इतिकाम्यस्नानं॥अथनैमित्तिकंस्नानं॥दिवाकीर्तिमुदक्यांचपतितंसूतिकांतथा॥शवंतत्स्पृष्टिनंचैवस्पृष्ट्वास्नानेनशुध्यति॥४३॥तत्स्पृष्टिनंस्पृशेद्यस्तुस्नानंतस्यविधीयते॥उर्द्धमाचमनंप्रोक्तंद्रव्यादेर्प्रोक्षणंमतं॥४४॥चंडालसूतकिशवैः संस्पृष्टंसंस्पृशेद्यदि॥प्रमादात्ततआचम्यजपंकुर्यात्समाहितः॥४५॥तत्स्पृष्टस्पर्शिनंस्पृष्ट्वाबुद्धिपूर्वंद्विजोत्तमः॥आचमेत्तुविशुध्यर्थेप्राहदेवःपितामहः॥४६॥चितिंचचितिकाष्ठंचयूपंचंडालमेवच॥स्पृष्ट्वादेवलकंचैवसचैलंजलमावि

शेत्॥४७॥बौद्धान्पाशुपतान्जैनान्लोकायतिककापिलान्॥
विकर्मस्थान्द्विजान्स्पृष्ट्वा सचैलं जलमाविशेत्॥देवार्चनप
रो विप्रो वित्तार्थी वत्सरत्रयं॥स वै देवलको नाम हव्यकव्येषु
गर्हितः॥४९॥शिवं सूर्यं तथा चंद्रं दुर्गादीरुद्रदेवताः॥योर्च
येत्पैण पूर्वं तु सद्यः पतति मानवः॥५०॥नस्नायाद्देवलं यूपं
देवस्थाने नैवेधने॥अन्यदा तावुभौ स्पृष्ट्वा सचैलो जलमावि
शेत्॥५१॥मृते जन्मनि संक्रांतौ श्राद्धे जन्मदिने तथा॥अ
स्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा॥५२॥इतिनैमित्तिक
स्नानं॥अथ मलापकर्षणस्नानं॥पक्षादौ च रवौ षष्ठ्यां र
क्तायां च तथा तिथौ॥तैलेनाभ्यज्यमानस्तु धनायुर्भ्यां वि
हीयते॥५३॥पंचदश्यां चतुर्दश्यामष्टम्यां रविसंक्रमे॥

२४

द्वादश्यां सप्तमी षष्ठ्यौ तैलस्पर्शं विवर्जयेत ॥५४॥ नच कुर्यात्ति
तीयायां त्रयोदश्यां तिथौ तथा ॥ नवम्यां च दशम्यां च क्षौम
मिच्छन्ति पंडिताः ॥५५॥ संतापः कीतिरल्पायुर्धनं निर्द्धना
तथा ॥ अपनारोग्य सर्वकामा अभ्यंगाङ्गारकरादिषु ॥५६॥
प्रातिप्रवसः ॥ सार्षपं गंधतैलं च यत्तैलं पुष्पवासितं ॥ अन्यद्र
व्ययुतं तैलं न दुष्यति कदाचन ॥५७॥ वृथा तत्स्नोदके स्नानं
वृथा जाप्यम वैदिकं ॥ वृथा चाश्रोत्रिये दानं वृथा भुक्तम
सात्विकं ॥५८॥ नित्यं नैमित्तिकं चैव क्रियांगं मलकर्षणं ॥
तीर्थाभावे तु कर्त्तव्यमुष्णोदकपरोदकैः ॥५९॥ आदित्य
किरणैः पूतं पुनः पूतं च वह्निना ॥ आम्नातमातुरस्नाने ॥१५॥
नग्नसंस्तरदकांगिनौ ॥६०॥ संक्रान्त्यां रविवारे च सप्तम्यां

राकुदर्शने॥ आरोग्य पुत्र वित्तार्थी न स्नायादुष्णवारिणा॥ ६१॥
संकल्पं सूक्तपठनं मार्जनं चाघमर्षणं॥ देवादि तर्पणं चैवं पं
चांगं स्नानमुच्यते॥ ६२॥ अथ गौणस्नानं॥ वृद्धमनुः॥ असाम
र्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया॥ मंत्रस्नानादिकं प्रोक्तं मु
निभिः शौनकादिभिः॥ ६३॥ आग्नेयं वारुणं ब्राह्मं वायव्यं दिव्य
मानसे॥ पार्थिवं कापिलं चैव स्नानं सारस्वतं तथा॥ ६४॥ स्ना
नं गायत्र्यं संध्यानं मंत्रस्नानं विशेषतः॥ आग्नेयं भस्मना स्नानं
अवगाह्य च वारुणं॥ आपो हिष्ठेति च ब्राह्मं वायव्यं रजसा ग
वां॥ ६५॥ यत्तु सातपवर्षेहि तत्स्नानं दिव्यमुच्यते॥ आपो हि
ष्ठादिभिर्मंत्रैर्मृदालंभस्तु पार्थिवं॥ ६६॥ स्नानान्येतानि
चाप्यस्तु मानसं विष्णुचिंतनं॥ अशक्तावशिरस्कं यन्मंत्र

१९

स्नानमुदीरितं॥६७॥आर्द्रेणवाससाचांगमार्जनंकापिलंस्मृ
तं॥विद्वसरस्वतीप्राप्तंस्नानंसारस्वतंविदुः॥६८॥गायत्र्या
जलमादायदशकृत्वोभिमंत्र्यच॥शिरःश्रोत्राणिसर्वाणिप्रो
क्षयेत्तेनवारिणा॥६९॥स्नानंगायत्रकंनामसर्वपापप्रणा
शनं॥अशक्तानांतुजंतूनांगुरोःपादोदकंशुभं॥७०॥विप्रपा
दाद्विष्णुपादात्तुलस्याःसंभृतंजलं॥प्रोक्षणात्स्नानमाप्नोति
ध्यानस्नानंविशिष्यते॥७१॥चतुर्भुजंमहाकायंशंखचक्र
गदाधरं॥ध्यायीतमनसाविष्णुंस्नानंमानसमीरितं॥७२॥
एतेस्नानानुकल्पैस्तुसंध्यायांध्यापनेशुचिः॥प्रातःस्ना
तुमशक्तस्यरोगाद्यैर्वाभयात्तुवा॥७३॥पूर्ववस्त्रंपरित्यज्य
गौणस्नानेनशुध्यति॥इतिस्नानविधिः॥अथातिलकं॥पर्व ॥१९॥

16

नागनदीतीरे मम क्षेत्रे विशेषतः॥ सिंधुतीरे च वल्मीकतुलसी
मूलमाश्रिताः॥७४॥ मृदं एतास्तु संपाद्यावर्जयेदन्यमृत्तिकाः
द्वारवत्युद्भवा क्वापीचं दनादूर्ध्वपुंड्रकं॥७५ जाह्नवीतीरसंभूतां
मृदं मूर्ध्ना बिभर्त्ति यः॥ बिभर्त्ति रूपं सोर्कस्य तमोनाशाय केवलं॥७६॥ श्यामं शांतिकरं प्रोक्तं रक्तं वश्यकरं भवेत्॥ श्रीकरं
पीतमित्याहुर्वैष्णवं श्वेतमुच्यते॥७७॥ अंगुष्ठः पुष्टिदः प्रोक्तो
मध्यमायुःकरी भवेत्॥ अनामिकान्नदा नित्यं मुक्तिदा च
प्रदेशनी॥७८॥ एतैरंगुलिभेदैस्तु कारयेन्न नखस्पृशेत
ललाटे केशवं विद्यान्नारायणमथोदरे॥७९॥ माधवं हृदि
विन्यस्य गोविंदं कंठकूपके॥ उदरे दक्षिणे पार्श्वे विष्णुमि
त्यभिधीयते॥८०॥ तत्पार्श्वे बाहुमध्ये तु विन्यसेन्मधुसू

१७

दनं॥ त्रिविक्रमं कण्ठदेशे वामकुक्षौ तु वामनं॥ ८१॥ श्रीधरं

बाहुके वामे हृषीकेशं तु कर्णके॥ पृष्ठदेशे पद्मनाभं ककु

द्दामोदरं स्मरेत्॥ ८२॥ द्वादशैतानि नामानि वासुदेवेति मू

र्द्धनि॥ संकर्षणादिभिः कृष्णे शुक्ले चैव केशवादिभिः॥ ८३॥

ऊर्द्ध्वपुंड्रं शिवस्यैवं विष्णोः कुर्युश्च वा बुधाः॥ मृद्भिर्मूलेन

मंत्रेण शोषं द्वादशनामभिः॥ ८४॥ स्थानेष्वेषु द्विजः कुर्यान्नि

मीतैः प्रणवेन वा॥ निटिले बाहुवच्चैव दंडवत्कर्णपद्मवं॥ ८५

हृदये कमलाकारमुदरे दीपवच्चि लिखेत्॥ वेणुपत्रसमा

कारं बाहुमध्ये समालिखेत्॥ ८६॥ अधः पृष्ठस्कंधदेशे

लिखेज्ज्ञेयं कृतिः॥ दशांगुलप्रमाणं तु ह्युत्तमोत्तममुच्य

ते॥ ८७॥ नवांगुलं मध्यमं स्यादष्टांगुलमतः परं॥ सप्तषट् ॥१७॥

फटा

पंचभिः पुंड्रं मध्यमं त्रिविधं स्मृतं ॥ चतुस्त्रिद्व्यंगुलैः पुंड्रं कनि
ष्ठं त्रिविधं स्मृतं ॥ शिवकेशवयोश्चिह्नान्यक्रमश्लादिकान्द्वि
जः ॥ न धारयेत मतिमान्वेदिकेवर्त्मनि स्थितः ॥ १९ ॥ मृत्तिका
चंदनं चैव भस्म तोयं चतुर्थकं ॥ एभिर्द्रव्यैर्यथाकालं मूर्द्ध्वपुं
ड्रं भवेत्सदा ॥ २० ॥ स्नात्वा पुंड्रं मृदा कुर्याद्धुत्वा चैव तु भस्म
ना ॥ देवानभ्यर्च्य गंधेन सर्वपापापनुत्तये ॥ २१ ॥ जलेन
तिलकं कुर्याज्जलांतः कर्मसिद्धये ॥ न कश्चिन्मृदाति यत्
न्यसेदूर्ध्वं न भस्मना ॥ २२ ॥ श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरा
र्चने ॥ धृतं तु त्रिपुंड्रः पूतात्मा मृत्युं जयति मानवः ॥ २३ ॥ सत्यं
शौचं जपो होमस्तीर्थं देवादिपूजनं ॥ तस्य व्यर्थमिदं सर्वं य
स्त्रिपुंड्रं न धारयेत् ॥ २४ ॥ ललाटे हृदये नाभौ गलांसे बाहु

५ वानप्रस्थस्य कन्यानां दीक्षाहीननृणां तथा ॥ मध्याह्नात्प्राग्जलैर्युक्तं परतो जलवर्जितं ॥ ५

संध्यषु ॥ एष्वङ्गे शिरस्येवं स्थानेष्वेतेषु धारयेत् ॥९५॥ अग्नि
रित्यादिभिर्मंत्रैः शुद्धब्रह्माभिमंत्रितं ॥ शिवमंत्रेण तद्धार्यं मं
त्रेणाष्टाक्षरेण वा ॥९६॥ गायत्र्या वा च देवर्षे मंत्रेण प्रणवेन
वा ॥ धार्यं भस्म त्रिपुंड्रं तु गृहिणा जलसंयुतं ॥९७॥ सोर्वक्त्रं
भवस्त्रीणां यतीनां जलवर्जितं ॥ मध्यांगुलित्रयेणैव स्व
दक्षिणकरस्य तु ॥ त्रिपुंड्रं धारयेद्विद्वान्सर्वकल्मषनाशनं ॥
मध्यमानामिकाङ्गुष्ठैरनुलोमविलोमतः ॥१००॥ अतिस्वल्प
दीर्घन्त ४ मनायुष्यमतिदीर्घं तपःक्षयं ॥ नेत्रयुग्मप्रमाणेन त्रिपुंड्रं धा
रयेद्द्विजः ॥१०१॥ षडङ्गुलप्रमाणेन ब्राह्मणानां त्रिपुंड्रकं ॥ नृपाणां
चतुरंगुल्यं वैश्यानां द्व्यंगुलं तथा ॥१०२॥ शूद्राणामथ सर्वेषा
मेकांगुल्यं त्रिपुंड्रकं ॥ त्रिपुंड्रं ब्राह्मणो विद्वान्मनसापि न लंघयेत् ॥१०३॥

18

स्मृत्या विधीयते यस्मात्तत्यागी पतितो भवेत्॥ त्रिपुंड्रेण विनाये
न विप्रेण यदनुष्ठितं॥१०४॥ न तद्ध्यानेन तज्ज्ञानं न तद्दानं जपो न सः॥
ये भस्मधारिणं दृष्ट्वा वाचा निंदंति मानवाः॥ तेषां शूद्रेण संभूतिरनुमे
या विपश्चिता॥१०५॥ अथ संध्यावंदनं॥ संध्या येन न विज्ञाता संध्या
येनानुपासिता॥ जीवमानो भवेच्छूद्रो मृतश्वा चाभिजायते॥१०६॥
संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु॥ यदन्यत्कुरुते कर्म
न तस्य फलभाग्भवेत्॥१०७॥ संध्यात्रयं तु कर्त्तव्यं द्विजेनात्मविदा
सदा॥ संध्या उपासते ये तु सततं शंसितव्रताः॥ विधूतपापास्ते
यांति ब्रह्मलोकं सनातनं॥ आदित्यस्यैव कालभेदेन नामान्या
ह॥ गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने॥ सरस्वती च सायाह्ने
ह्ने सैव संध्या त्रिषु स्मृता॥१०८॥ गायत्री तु भवेद्रक्ता सावित्री शु

१९

क्षवर्णिका॥ सरस्वती न या ब्रह्मा उपास्या वर्णभेदतः॥१९॥ गाय
त्री ब्रह्मरूपा तु सा वित्री रुद्ररूपिणी॥ सरस्वती ब्रह्मरूपा उपास्या
वर्णभेदतः॥२०॥ प्रतिग्रहान्नदोषात्तु पातकादुपपातकात्॥ गा
यत्री प्रोच्यते यस्मात् गायंतं त्रायते ततः॥२१॥ अथ कालः॥ उत्तमा ता तर्य५
रकोपेता मध्यमा लुप्ततारका॥ अधमा सूर्यसहिता प्रातःसंध्या
त्रिधा मता॥२२॥ उत्तमा सूर्यसहिता मध्यमा लुप्ततारका॥ क
निष्ठा तारकोपेता सायं संध्या त्रिधा मता॥ संध्याकालः प्रा
गुदयाद्विप्रस्य त्रिमुहूर्तकः॥ क्षत्रियस्य तदर्द्धं स्यात्तदर्द्धं स्या
द्विशां स्मृतौ॥२५॥ रात्र्यंते यामनाडीद्वे संध्याकालोयमुच्यते॥
यार दर्शनाद्रविरेखायास्तदंतो मुनिभिः स्मृतः॥२६॥ अध्यर्द्धयामा
द्सायं संध्या क्षिकीष्यते॥ अथ देशः॥ व्यासः॥ गृहे त्वेकगु ॥१९॥
संध्या

णासंध्यागोष्ठेदशगुणास्मृताः॥शतंसा हस्तिकानद्यां अनंताविष्णुसंन्निधौ॥२०७॥बहिःसंध्यादशगुणागर्त्तप्रस्रवणेषुच॥ख्यातेतीर्थेशतगुणाह्यनंताजाह्नवीजले॥२०८॥अनृतंमद्यगंधंचदिवामैथुनमेवच॥पुनातिवृषलस्यान्नंबहिःसंध्याउपासिता॥२०९॥ नासिकामंगुलीभिश्चतर्जनीमध्यमादृते॥दक्षिणेनकृष्यसव्ये [illegible] नतुविसर्जयेत्॥२१०॥प्रणवंव्याहृतीःसप्तगायत्रींशिरसासह॥त्रिःपठेदायतःप्राणःप्राणायामःसउच्यते॥२११॥शनैर्नासापुटेवायुमुत्सृजेन्नतुवेगतः॥नकंपयेच्छरीरंतुसयोगीपरमोमतः॥२१२॥सूर्यश्चेत्यनुवाकेनप्रातःकालेपिबेदपः॥अग्निश्चेत्यनुवाकेनसायंकालेतथैवच॥२१३॥आपःपुनंतुमध्याह्नेमीत्वाचमनमाचरेत्॥आपोहिष्ठेतिसूक्तेनरुगंतेनतुमार्जनं॥२१४॥ अर्द्धर्चांतेनपादेनकुर्याद्वाशिष्टस्यसंमतं।करेणोद्धृत्य

सलिलं घ्राणमासज्य तत्र च ॥ जपेदनियतासुर्वा त्रिःसकृ
द्वाघमर्षणं ॥२१५॥ ततो जलं प्रगृह्याथ प्राङ्मुखोंजलिनास्म
रेत् ॥ स्नानादौ स्तु स्थितं तेजः स्फटिकज्योतिषासमं ॥२१६॥
व्याहृत्यादिजपेन्मंत्रं स्मृत्वैवं परितो रवेः ॥ मंदेहान्युध्यतः क्रू
रान्निक्षिपेत्तद्वधायांजलिम् ॥२१७॥ षोडशाक्षरमंत्रेण पुनरा
हृष्य सत्वरः ॥ पुनर्जलं गृहीत्वैव तेजो मंत्रं च संस्मरन् ॥२१८॥
सव्याहृतिकां गायत्रीमुच्चार्य त्रिः क्षिपेज्जलं ॥ मुक्तहस्ते
न दातव्यं मुद्रां तत्र न कारयेत् ॥२१९॥ तर्जन्यंगुष्ठयोगे तु रा
क्षसी मुद्रिका स्मृता ॥ राक्षसीमुद्रिकार्घेण तत्तोयं रुधि
रं भवेत् ॥२०॥ उदुत्यमिति सूक्तेन तत्र प्रस्थाय दिवाकरं ॥ सं
ध्यद्वयं ततो जापं गायत्रीं वेदमातरं ॥२१॥ याज्ञवल्क्यः ॥५॥

20

जपन्नासीनसावित्रीप्रत्यगातारकोदयात्॥ संध्याप्राकुप्रातरेवं
हितिष्ठेदासूर्यदर्शनात्॥२२॥ व्यासः॥ अष्टोत्तरशतंनित्यमष्टा
विंशतिमेववा॥ विधिनादशकंवापित्रिकालेषुजपेद्बुधः॥२३॥
आसनान्याह॥ कौशेयंकंबलंचैवअजिनंपट्टमेवच॥ दारुजं
तालपत्रंवा आसनंपरिकल्पयेत्॥२४॥ तेषांफलान्याह॥ कृष्णा
जिनेज्ञानसिद्धिर्मोक्षश्रीव्याघ्रचर्मणि॥ वशाजिनेव्याधिनाशःकं
बलेदुःखमोचनं॥२५॥ अभिचारेनीलवर्णंरक्तंवश्यादिकर्मणि॥
शांतिकंकंबलंप्रोक्तंसर्वेष्टंचित्रकंबलं॥२६॥ वंशासनेतुदारि
द्र्यंपाषाणेव्याधिसंभवः॥ धरण्यांदुःखसंभूतिर्दौर्भाग्यंछिद्रदा
रुजे॥२७॥ तृणेधनयशोहानिःपल्लवेचित्तविभ्रमः॥ सायंप्रात
श्चमध्याह्नेसावित्रीवाग्यतोजपेत्॥२८॥ सहस्रपरमांदेवीं

शतमध्यांद्दशावरां॥गायत्रीं संस्मरेद्धीमानृहृद्दिवास्तर्यमं
डले॥२९॥मनःसंतोषणंशौचंमौनंमंत्रार्थचिंतनं॥अव्य
ग्रत्वमनिर्वेदोजपसंपत्तिहेतवः॥३०॥उत्तमंमानसंजप्यंउ
पांशुमध्यमं विदुः॥अधमं वाचिकं प्राहुः सर्वमंत्रेषुवैद्विजाः॥
३१॥वस्त्रेणाछाद्यतुकरं दक्षिणं यः सदाजपेत्॥तस्यतस
२१ फलंजप्यंतद्धीनमफलंस्मृतं॥३२॥गच्छंस्तिष्ठंस्तोवापिस्व
ना ५ छयाकर्मकुर्वतः॥अशुचेर्वाविनासंख्यांतत्सर्वंनिष्फलंभ
वेत्॥रजतंद्राक्षकैर्मालांतथैवांगुलिपर्वभिः॥शतंस्यादधं
खमणिभिःप्रवालैश्चसहस्रकं॥३४॥स्फटिके दशसाहस्रं
मौक्तिकेर्लक्षमुच्यते॥पद्माक्षैर्दशलक्षंतुसौवर्णैःकोटिरु
च्यते॥३५॥कुशग्रंथ्याचरुद्राक्षैरनंतंफलमुच्यते॥अष्टो ॥२१॥

त्तरशतंकुर्यान्न तुःपंचाशिकांतथा॥३६॥सप्तविंशतिकावापि
ततोनैकाधिकामता॥ततोजपंनिवेद्याथजातवेदसेतछंयोः॥
३७॥नमोब्रह्मणेदिशोनत्वासावित्र्यारीस्तांतस्मरेत्॥उत्तमेशि
खरेदेविभूम्यांपर्वतमूर्द्धनि॥३८॥ब्राह्मणेरभ्यनुज्ञातागछ
देवियथासुखं॥संध्योपिसर्ज्यभद्रंनोशांतिस्त्रिःसायमित्य
पि॥३९॥सूतकेविशेषः॥भरद्वाजः॥सूतकेमृतकेवापिप्राणा
यामममंत्रकं॥तथामार्जनमंत्रांस्तुमनसोच्चार्यमार्जयेत्॥
गायत्रींसम्यगुच्चार्यसूर्यायार्घंनिवेदयेत्॥मार्जनंतुनं
वाकार्यमुपस्थानंनचैवहि॥४०॥आपन्नश्चाप्यशुचिःकाले
गायत्रींचजपेद्दश॥जलाभावेमहामार्गेबंधनेत्वशुचावपि॥
पि॥उभयोःसंध्ययोःकालेरजसावार्घ्यमुत्सृजेत्॥४१॥

अथहोमविधिः॥दक्षः॥संध्याकर्मावसानेतुस्वयंहोमोविधीयते
ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोथविट्पतिः॥एतैरपिहुतंयस्या
स्तद्धुतंस्वयमेवहि॥४२॥अपसमस्तैतुदंपत्योर्होतव्यंनऋत्विगा
दिना॥द्वयोरप्यसमस्तंतुभवेद्धुतमनर्थकं॥४३॥होमकालः॥
उदितेनुदितेहोमसमयाध्युषितेतथा॥यावत्सम्यङ्नभा
व्यंतेनभस्यृक्षाणिसर्वतः॥लोहितत्वंतुनापैतितावत्सायंतु
22 हूयते॥४४॥अथगौणकालः॥आसायंकर्मणःप्रातराप्रा
तःसायंकर्मणः॥आकुनिर्नातिपद्येतपार्वणंपार्वणांत
रात्॥४५॥पत्नीहोममाहमरीचिः॥शरीरापद्भवेद्यत्रभया
द्वाग्निःप्रजायते॥तथान्योन्यस्यचाप्यस्तुपत्नीहोमोविधीय
ते॥४६॥पुनराधाननिमित्तानि॥अपत्नावनुगतेयस्यहोम ॥२२॥

×त्यायेत स्पृष्टुनराधान्नाग्निव्यतोऽसश्रौतापानौ
विच्छेदः। होमविता॥ २
कालद्वयं अजेत॥ उभयोर्विप्रवासेवालौकिकोग्निर्विधीयते॥
४७॥ विहायाग्निं सभार्यश्चेत्सीमामुल्लंघ्यगच्छति॥ होमकाल छ२
कृत्वास्मार्तं कुर्यात् द्विजसत्तमः॥ स्मृतीनां वेदमूलत्वात्स्मार्तं के
चित्सुराविदुः॥ कर्मस्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही॥
दायकालाहृते वापि श्रौतं वैतानिकाग्निषु॥ ५०॥ मनुः वैवा
हिकेग्नौ कुर्वीत गार्ह्यं कर्मयथाविधि॥ पंचयज्ञविधानं च
पक्तिं चान्वाहिकीं गृही॥ ५१॥ एकस्मिन्नप्यतिक्रांते दिने दा
नविवर्जिते॥ दस्युभिर्मुषितस्येवयुक्तमाक्रंदितं भृशं॥ ५२॥
मंगलदर्शनं॥ नारदः॥ लोकेस्मिन्मंगलान्यष्टौ ब्राह्मणो गौ
र्हुताशनः॥ हिरण्यं सर्पिरादित्य मापोराजातथाष्टमः॥
५३॥ एतान्नित्यं पश्यति तु स्त्रीराजाभिक्षुर्महोदधिः॥

दृष्टमात्राःपुनंत्येतेतस्मात्पश्येत्सदाबुधः॥५४॥इत्यह्नःप
थमभागकृत्यं॥दक्षः॥द्वितीयेचतथाभागेवेदाभ्यासोविधी
यते॥वेदस्वीकरणंपूर्वंविचारोभ्यसनंजपः॥तद्दानंचैव
शिष्येभ्योवेदाभ्यासोहिपंचधा॥५५॥समित्पुष्पकुशादी
नांसकालःसमुदाहृतः॥इत्यथतृतीयभागकृत्यं॥दक्षः॥
तृतीयेचतथाभागेपोष्यवर्गार्थसाधनं॥मातापितागु
रुर्भार्याप्रजादीनःसमाश्रिताः॥अभ्यागतोतिथिश्चाग्नि ४
पोष्यवर्गइमेदश॥५७॥पोष्यवर्गार्थसिद्ध्यर्थंधनमिच्छेत ध्य४
बुद्धिमान॥याज्ञवल्क्यः॥कुसूलकुंभीधान्योवात्र्याहिको
श्वस्तनोपिवा॥जीवेद्वापिशिलोंछेनश्रेयानेषांपरःपरः॥
५८॥नराज्ञःप्रतिगृह्णीयाल्लुब्धस्योछास्त्रवर्तिनः॥शौकुंशा

कं पयो मत्स्याः पुष्पं गंधा दधि क्षितिः ॥ मांसं शय्यासनं धानाः प्रत्या
यं २ ख्येयं नवारि च ॥ ५९ ॥ अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मणः ॥ अन्य
त्र कुलटाषंढपतितेभ्यस्तथा द्विषः ॥ ६० ॥ अथ चतुर्थनागकृत्यं ॥
दक्षः ॥ चतुर्थे तु तथा भागे स्नानार्थं मृदमाहरेत् ॥ तिलपुष्पकु
द्या ५ शादींश्च स्नायादकृत्रिमे जले ॥ ६१ ॥ स्वगृह्यविधिना स्नात्वा ब्रह्म
पं ६ यज्ञं ततो द्विजः ॥ स्वाध्यायतर्पणाभ्यां च गृहमेत्याचरेत्पचनं ॥ ६२ ॥
स चार्वाक्तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः ॥ वैश्वदेवावसाने
वानान्यत्रेति निमित्ततः ॥ ६३ ॥ ब्रह्मयज्ञप्रकारः ॥ दर्भान्बहून्शु
चौ देशे प्रागग्रानास्तृणात्यथ ॥ दर्भेषूपवि शेत्कर्मण्यत्र
प्राङ्मुख एव सन् ॥ कृत्वोपस्थं करे सव्ये उत्ताने प्रागुदगंगु
ले ॥ पवित्रे स्थापयेद्रुक्मे प्रागग्रे दक्षिणेन तु ॥ ६४ ॥ न्यंचं प्रागं
गुलं तेन संदध्याद्दक्षिणं करं ॥ स्रकाद्यन्यतमं पूर्वममित्रां

संतिशक्तितः॥६६॥ॐपूर्वाव्याहृतीस्तिस्रस्समस्ताश्चसकृद्वदे
त्॥पच्छस्त्वर्द्धर्चशः सर्वांसावित्रीं त्रिवदेद्बुध॥६७॥ततोयाव
त्प्रतिज्ञातमध्यायंसूक्तमेववा॥ऋचंवाथततोवश्यंमधी
यीतस्वशक्तितः॥६९॥ऋग्विधाने॥आग्नेयंसूक्तमाद्यंतंमुखं
ब्रह्मर्षिसंमतं॥रायस्पोषकरंधन्यंजपन्विप्रोर्थमाप्नुयात्॥७०॥
ऋषिंसर्वमिमंजप्त्वासपुत्रंनियतःशुचिः।संहिताफलमाप्नो
त्यृग्वेदस्यनसंशयः॥७१॥अग्निमीळेजपेत्सूक्तंपापघ्नंश्रीक
रंपरं।पारायणफलंतस्यवेदानांस्यात्सहस्रशः॥७२॥याव
च्छक्यमधीत्यांतेत्रिर्नमोब्रह्मणेपठेत्॥ब्रह्मयज्ञंजपेत्स्व
ल्पमनध्यायेषुसर्वदा॥७३॥अथतर्पणं॥अपांसमीप
मागत्यतर्पयेद्देवताः॥एवमंतानितृप्यंत्वित्यंतैः
षट्त्रिंशामंत्रकैः॥७४॥सिंचेदपोग्रस्तत्प्यतुदेवतीर्थे ॥२४॥

25

नसव्यतः॥ भूत्यादि सर्वभूतानि तर्पयामीत्यनुब्रुवन्॥ तर्पये
न्पित नीर्थनृशतत्र्यादि पसव्यतः॥ सनकश्च सनंदनस्तृ
तीयश्च सनातनः॥ कपिलश्चासुरश्च वोढुः पंचशिख
स्तथा॥ एते ब्रह्मशिखास्तर्प्या मनुष्याः परिकीर्तिताः॥
क ५ ७७॥ व्यासः॥ एकैकमंजलिं देया द्वौ द्वौ तु सनकादयः॥ अर्हति पि
तरस्त्रीस्त्रीन्स्त्रियश्चैकैकमंजलिं॥ शांखायः॥ मातृमु
ख्यास्तु याः स्त्रियस्ताः सांद्रीस्त्रीजलांजलीन्॥ सापत्नी चा
र्यपत्नीनां द्वौ द्वौ दद्याज्जलांजली॥ ७८॥ कुशाग्रैस्तर्पयेद्देवा
न्मनुष्यान्कुशमध्यतः॥ द्विगुणीकृत्य मूलाग्रैः पितृन्संत
र्पयेद्द्विजः॥ ८०॥ तर्पणे क्रममाह॥ आदौ पिता ततो माता सा
पत्नजननी तथा॥ मातामहाः सपत्नीकाः स्वपत्नी तदनंतं

रं॥८२॥सुतभ्रातृपितृव्याश्च मातुलाश्च सभार्यकाः॥दुहिता
भगिनीचैव दौहित्रो भागिनेयकः॥पितृष्वसा मातृष्वसा श्व
श्रुरो गुरुरृत्विनः॥८३॥याज्ञवल्क्यः॥यद्युद्धृतं निषिं
चेन्नु तिलान्संमिश्रयेज्जले॥अतोन्यथा तु सव्येन तिला
ग्राह्या विचक्षणैः॥८४॥रोमसंस्थान् तिलान् कृत्वा यस्तु
तर्पयते पितॄन्॥पितरस्तर्पितास्तेन रुधिरेण मलेन वा॥ ८५॥
पतंत दाश्मपत्रेषु रोमकूपेषु ये तिलाः॥ते तिलाः कृमिसं
युक्तास्तज्जलं रुधिरायते॥८६॥शौनकः॥देवादितर्पणं
कृत्वा वस्त्रं निःपीड्य शोधयेत्॥स्नानार्थं प्रस्थितं विप्रं दे
वाः पितृगणैः सह॥८७॥वायुरूपेण तिष्ठंति तृषितास्तेज

त्वार्थिनः॥ निराशास्तु निवर्तन्ते वस्त्रनिष्पीडने कृते। तस्मान्न पीड
येद्वस्त्रमकृते तर्पणे द्विजः॥८८॥ अथ भीष्मतर्पणं॥ कृष्णाष्टम्यां
तु माघस्य दद्याद्भीष्माय यज्जलं॥ संवत्सरकृतं पापं तत्क्षणादे
व नश्यति॥८९॥ वैयाघ्रपादगोत्राय सांकृत्यप्रवराय च॥ गंगा
पुत्राय भीष्माय प्रदास्येहं जलांजलिं॥९०॥ अपुत्राय ददा
म्येतत्सलिलं भीष्मवर्मणे॥ अथ यमतर्पणं॥ वृद्धमनुः॥ दी
पोत्सवचतुर्दश्यां कार्यं तु यमतर्पणं॥ कृष्णांगारचतुर्दश्यां
मपि कार्यं सदैव वा॥९१॥ इह जन्मकृतं पापमन्यजन्मा
२ र्जितं च यत्॥ कृष्णांगारचतुर्दश्यां तर्पयंस्तद्व्यपोहति॥९२॥ य
माय धर्मराजाय मृत्यवे चांतकाय च॥ वैवस्वताय कालाय

२९

या

सर्वभूतक्षयाय च॥ औदुंबराय दध्नाय नीलाय परमेष्ठिने॥ वृको
दराय चित्राय चित्रगुप्ताय ते नमः॥ एकैकेन तिलैर्मिश्रांस्त्री
न्त्रीन्दद्याज्जलांजलीन्॥ यावज्जीवकृतं पापं तत्क्षणादेव नश्य
ति॥ ८॥ यज्ञोपवीतिना कार्यं प्राचीनावीतिना तथा॥ देवत्वं च
पितृत्वं च यमस्यास्य द्विरूपता॥ ९॥ नंदायां भार्गवे भानौ
कृत्तिकासु मघासु च॥ भरण्यां जन्मनि गृहे संपत्कामो न
दद्यात्॥ युगादिषु गजच्छायामन्वादिषु पितृक्षये॥ पिंडदानं स
यावज्जं मस्नानं तिलतर्पणं॥ पुत्रभृत्यकलत्रार्थी न तु कुर्या
त्कथंचन॥ १०॥ विवाहव्रतचूडासु वर्षमर्धं तदर्धकं॥ पिंड
दानं मृदास्नानं न कुर्यात्तिलतर्पणं॥ संस्कारेषु तथान्येषु ॥२९॥

26

जातपुंसवनादिषु ॥ यावन्मासः समाप्येत तावत्तिं ओंश्च वर्ज
येत् ॥ २२ ॥ वृक्षावनंतरं श्राद्धस्तथैव तिलतर्पणं ॥ संक्रांत्यादिनि
मित्तेषु स्नानांगे तर्पणे तथा ॥ २३ ॥ तिथि वारा निषेधे पि तिलै
स्तर्पणमाचरेत् ॥ उपरागे पितुः श्राद्धे पाते मायां च संक्रमे
२४ ॥ अथ देवपूजा ॥ नृसिंहपुराणे ॥ जलदेवं नमस्कृत्य त
तो गच्छेद्गृहं बुधः ॥ पौरुषेण च सूक्तेन ततो विष्णुं समर्चयेत् ॥
२५ ॥ महाभारते ॥ कलौ कालिमलध्वंसं सर्वपापहरं हरिं ॥
येर्चयंति नरा नित्यं तेपि वंद्या यथा हरिः ॥ २६ ॥ पंचायत
नस्थापनप्रकारः ॥ शंभौ मध्यगते हरीनहरभूदेव्यो हरौ
शंकरेभास्यनागसुतारख्वो हरगणेशाजांबिकास्थापि

27

ताः॥३ देव्यां विस्नुर्हरे कदंतरवयो ४ लंबोदरे जेश्वरे नार्याः॥ पशं
कर भागतो तिस्नु रवदाव्यस्तास्तुतेहा निदाः॥१९७॥ मुख्य पुष्पां
जलिं दत्वा गणेशाद्यार्चनं भवेत्॥ गणेशाख्य मुख्यश्चेन्नत्र
स्तूर्यक्रमोद्भवेत्॥१९८॥ पुष्पैरारण्य संभूतैः पत्रैर्वा गिरि सं
भवैः॥ अप[illegible]र्युषित निछिद्रैः प्रोक्षितैर्जंतुवर्जितैः॥१९९॥ आ
त्मारामोद्भवैर्वापि भक्त्या संपूजयेत्सुरान्॥ कृमि कीटा
वपन्नानि शीर्णपर्युषितानि च॥२००॥ स्वयं पतित पुष्पा
णि त्यजेत्तु पहितानि च॥ मुकुलैर्नार्चयेद्देवमपक्वं न नि
वेदयेत् ३०१॥ फलं च कृमि बद्धं च प्रयत्नात् द्विवर्जयेत्॥ अला
भे तु सुपुष्पाणां पत्राण्यपि निवेदयेत्॥२०२॥ पत्राणामप्य ॥२७॥

लाभेतु फलान्यपि निवेदयेत्॥ फलानामप्यलाभेतु तृणगुल्मौ
षधीरपि॥ ओषधीनामलाभेतु भक्त्या भवति पूजितः॥ स्नाग्नि
श्चन्नपशाईस्नितद्देवाद्विगुणंभवेत्॥ २५॥ सामित्पुष्पकुशादी
नि ब्राह्मणः स्वयमाहरेत्॥ शूद्रानीतैः क्रयक्रीतैः कर्मकुर्व
न्पतत्यधः॥ २६॥ सामित्पुष्पकुशादीनि वहंतं नाभिवादयेत्॥
तद्धारणेचवनान्यानि हि निर्माल्यं तद्भवेन्नयोः॥ २७॥ देवोपरि
धृतं यच्च वामहस्तेधृतं च यत्॥ अधोवस्त्रधृतं यच्च जलेंतः
स्थं॥ लितं च यत्॥ २८॥ देवतास्तं न गृह्णाति पुष्पं निर्माल्य
तां गतं॥ देवतार्थं च कुसुममस्तेयं मनुरब्रवीत्॥ २९॥ पु
ष्पाणां कालेनविशेषतो निर्माल्यतामाह॥ भविष्यत्पुराणे॥
प्रहरं तिष्ठते जाती करवीरमहर्निशं॥ तुलस्यां बिल्वपत्रेषु

२८

जलजेषु च सर्वशः ॥ न पर्युषितदोषोस्ति मालाकारगृहेषु च
३१०॥ मुकुलानि कदंबानि रात्रौ देयानि भास्करे ॥ कनकानि
कदंबानि रात्रौ देयानि शंकरे। दिवा चान्यानि पुष्पाणि दि
वा रात्रौ च मल्लिका ॥३११॥ अथ निषिद्धानि॥ केतकी चाति
मुक्तश्च कुंदो यूथो मदंतिका। शरीषसर्जबंधूककुसुमं व
र्जयेच्छिवे ॥३१२॥ शिवे विवर्जयेत्कुंदमुन्मत्तं च तथा हरौ
देवीनामर्कमंदारौ सूर्यस्य तगरं तथा॥३१३॥ अथ विहितपत्रा २०
णि॥ अपामार्गस्य प्रथमं भृंगराजमतः परं॥ तस्मात्तु
खादिरं श्रेष्ठं ततो बिल्वस्य पत्रकं॥ बिल्वपत्रादपि हरेस्तु
लसीपत्रमुत्तमं॥ एतेषां तु यथालाभं पत्रैर्यश्चार्चयेद्ध
रिं॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीयते॥ लक्षमर्द्ध ॥२८॥
३१४ शमीपत्रं ततः परं॥ दूर्वापत्रं तथा श्रेष्ठं ततोपि कुशपत्रकं॥ तस्मा
द्दमनकं श्रेष्ठं

28

निविन्यस्तातुलसीपत्रमंजरी॥ सुवर्णकोटिपुण्यानां पुण्यं यच्छ
त्यतोधिकं॥१८॥ अथपूजायत्नानि॥ =अफ्च ग्नो हृदयेसूर्ये स्थ
ण्डिलेप्रतिमासु च॥ षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिस्मृतं॥
॥१९॥ कामासक्तोथवाक्रुद्धः शालग्रामशिलार्चनात्॥ भक्त्या
वायदिवाभक्त्याकलौमुक्तिमवाप्नुयात्॥२०॥ वैवस्वतभयं
नास्तितथाकलिकालजं॥ यः करोतिकुरुतेयस्तु शालिग्रामशि
लाग्रतः॥२१॥ शालग्रामशिलायास्तु प्रतिष्ठा नैव विद्यते॥
महापूजां तु कृत्वादौ पूजयेत्तां ततो बुधः॥२२॥ बाणलिंगानि
राजेंद्र ख्यातानि भुवनत्रये॥ नप्रतिष्ठानसंस्कारस्तेषामा
वाहनं तथा॥२३॥ शालग्रामाः समाः पूज्या विषमा नकदा
च न॥ समेषु द्वितयं नैव विषमेष्वेकमेव हि॥ स्त्रीशूद्रपति

२९

तादीनांषंढानांचविकर्मिणां नैवाधिकारोविज्ञेयःशालग्राम
शिलार्चने ॥ २२४ ॥ नार्च्यागृहेश्मजामूर्त्तिश्चतुरंगुलतोधि
धि३ का ॥ नवितस्त्यंकाधातुसंभवाश्रेयइच्छता ॥ २२५ ॥ गृहेलिं
गद्वयंनार्च्यंगणेशत्रितयंतथा ॥ शक्तित्रयंतथाशंखंम
स्योद्विकशाकांकितं ॥ २२६ ॥ पूजेतिकर्त्तव्यता ॥ अर्चनं संप्र
मि वक्ष्यामि विस्तारमिततेजसः ॥ यत्कृत्वामुनयःसर्वेपरंनिर्वा
२९ णमाप्नुयुः ॥ २२७ ॥ आनुष्टुभस्यसूक्तस्यत्रिष्टुवंतस्यदेवता॥
पुरुषोयोजगद्बीजमृषिर्नारायणःस्मृतः ॥ २२८ ॥ हस्तयोः
पादयोर्जान्वोःकट्योर्नाभौहृदिन्यसेत् ॥ कंठेबाह्वोर्मुखे
दृशोश्चमूर्ध्निषोडशावामतः ॥ २२९ ॥ यथादेहेतथादेवेन्या
संकृत्वायथाविधि ॥ न्यासेनतुभवेत्सोपिस्वयमेवजनार्दनः ॥ ॥ २२९ ॥

वि

॥३३॥ एवंन्यासविधिंकृत्वापश्चात्पूजांसमारभेत॥ आवाहनासनेपा
द्यमर्घ्यमाचमनंतथा॥३१॥ स्नानवस्त्रोपवीतानिसाचनोन्यनुले
पनं॥ पुष्पंधूपश्चदीपश्चनैवेद्यंसोदकंनमः॥ प्रदक्षिणादक्षि
णाचेत्युपचारास्तुषोडश॥३२॥ पुनःषोडशभिर्मंत्रैर्दद्यात्पु
ष्पाणिषोडश॥ अथाद्यंशिवनिर्माल्यंपत्रंपुष्पंफलंजलं॥ शा
लग्रामस्यसंसर्गात्सर्वंयातिपवित्रतां॥३३॥ योमोहाद्यथवाल
स्यादकृत्वादेवपूजनं॥ भुंक्तेसयातिनरकंसूकरेष्वभिजाय

५ना

ते॥३४॥ अथपार्थिवपूजा॥ नंदिपुराणे॥ आयुष्मान्बल
वान्श्रीमान्पुत्रवान्धनवान्सुखी॥ वरमिष्टंलभेल्लिंगं
पार्थिवंयःसमर्चयेत्॥३५॥ भविष्योत्तरे॥ भस्मगोशकृत्पिं
डंताम्रंकांस्यमयंतथा॥ कृत्वालिंगंसकृत्पूज्यवसेत्कल्पा

युषंदिवि॥३६॥अल्पादल्पपरीमाणंनलिंगंकुत्रचिन्नरः॥कु
र्वीतांगुष्ठतोह्रस्वंनकदाचित्समाचरेत्॥३७॥अंगुष्ठांगुलि
मानंतुयत्रयत्रोपदिश्यते॥तत्रतत्रबृहत्पर्व ग्रंभिर्मिनु थि२
याःसदा॥३८॥देवीपुराणे॥मदाहरणसंघट्टप्रतिष्ठाह्वान
मेवच॥स्नपनंपूजनंचैवविसर्जनमतःपरं॥३९॥हरोमहे
श्वरश्चैवशूलपाणिःपिनाकधृक्॥पशुपतिःशिवश्चैवम
30 हादेवइतिक्रमात्॥प्रयोगानुष्ठानं॥ॐहरायनमःइतिम
दाहरणं।महेश्वरायनमइतिसंघट्टनं॥शूलपाणेनम
इहसुप्रतिष्ठितोभवेतिप्रतिष्ठा॥ध्यायेन्नित्यंमहेशंरज
तगिरिनिभंचारुचंद्रावतंसं।रत्नाकल्पोज्वलांगंपरशु

मृगवराभीतिहस्तं प्रसन्नं। पद्मासीनं समंतात्स्तुतममरगणैर्व्या
घ्रकृत्तिं वसानं। विश्वाद्यं विश्वबीजं निखिलभयहरं पंचवक्त्रं त्रि
नेत्रं ॥ इतिध्यात्वा॥ पिनाकधृगिहागच्छेत्यावाह्य ॐ पशुपतये
नमइति स्नपनं। ॐ नमः शिवाय नमइति एवमर्घ्यादिना पूज
येत् ॥ विसर्जनात्पूर्वं भविष्यत्पुराणोक्तमैशान्यादिषु दि
क्षुवामावर्त्तेन पूजनं ॥ यथा॥ ॐ शर्वाय क्षितिमूर्त्तये नमः।
ॐ भवाय जलमूर्त्तये नमः॥ ॐ रुद्रायाग्निमूर्त्तये नमः॥ ॐ उ
ग्रायवायुमूर्त्त०। ॐ भीमायाकाशमूर्त्त०। ॐ पशुपतये यजमा
नमूर्त्त०। महादेवाय सोममूर्त्त०। ईशानाय सूर्यमूर्त्त०। ॐ म
हादेवाय नमस्चेति संहारमुद्रया। विसर्जयेत्॥ पंचसूत्र

ॐ २ ईमि॥२

लिंगंसिद्धांतशेषरे॥लिंगमस्तकविस्तारंपूजाभोगसमंन
येत्॥नाहंत्रिगुणंकुर्यान्नाहवत्पीठविस्तृतिं॥पूजांश
त्रिगुणंकुर्याद्वृत्तंतपीठमुत्तमं॥वृत्तंवाचतुरस्रंवामध्ये
कंठसमन्वितं॥द्विगुणंलिंगनाहाच्चकंठनाहंसमाचरे
त्॥त्रिमेखलमधश्चोर्द्ध्वंसमंवायद्विमेखलं॥लिंगमस्त
कविस्तारंषड्भागंविभजेत्ततः॥मेख[illegible]लामेकभागेनकु
र्याद्वृत्तंचसमं॥लिंगदैर्घ्यसमंकुर्यात्प्रणालंपीठबाह्यतः
विस्तारंतसमंमूलेतदर्द्धंचतदग्रतः॥जलमार्गःप्रकर्तव्य
स्तस्यमध्येत्रिभागतः॥कुर्यात्पीठार्धदीर्घंवाप्रणालं
वाशिवागमादिति॥ अथवैश्वदेवविधिः॥वैश्वदेवेःप्र ॥३१॥

कर्त्तव्यं पंचसूनापनुत्तये। पंचसूनागृहस्थस्य वर्त्तन्ते हरहः स
दा। खंडनी पेषणी चुल्ली जलकुंभ उपस्करः॥ अनग्निकस्तु
यो विप्रः सोन्नं व्याहृतिभिः स्वयं॥ हुत्वा शाकलमंत्रैस्तु शि
ष्टाद्भुतबलिं हरेत॥ विष्णुः॥ वहु श्रुष्के धने चाग्नौ सुसमिद्धे हुता मि४
शने॥ विधूमे लेलिहाने च होतव्यं कर्म सिद्धये॥ ८४॥ यो
नर्चिषि जुहोत्यग्नौ व्यंगारे चैव मानवः॥ मंदाग्निरामयावी
च दरिद्रश्चापि जायते॥ ८५॥ अध्यापनं ब्रह्मयज्ञः पितृयज्ञ
स्तु तर्पणं। होमो दैवो बलिर्भौतो नृयज्ञोतिथिपूजनं॥ ८६॥
श्राद्धं वा पितृयज्ञः स्यात्पित्र्यो बलिरथापि वा॥ यश्च श्रु
तिजपः प्रोक्तो ब्रह्मयज्ञः स चोच्यते॥ ८७॥ वैश्वदेवं प्रकुर्वीत

३२

32

स्वशाखाविहितंततःसंस्कृतान्नैर्विविधैर्हविष्यव्यंजनान्वितैः।
४०८॥जुहुयात्सर्पिषाभ्यक्तंतैलक्षारविवर्जितं।शालाग्नौलौ
किकेवापिजलेभूम्यामथापिवा।४०९।होमान्नदानरहितं
नभोक्तव्यंकथंचन।पयोमूलफलैर्वापिपंचयज्ञान्समा
पयेत्।४१०॥सूतकेकर्मणांत्यागःसंध्यादीनांविधीयते।
पंचयज्ञविधानंतुनकुर्यान्मृतजन्मनोः॥४११॥अन्ना
भावेनकेनापिफलशाकादिभिर्द्विजः।पयोदधिघृतैर्वा
पिवैश्वदेवंस्रुवेणतुहस्तेनान्नादिनाकुर्याद्विरंजलि
नाजलेऽउत्तानेनतुहस्तेनह्यंगुष्ठाग्रेणपीडितं।संहि ॥३२॥
तांगुलिपाणिस्तुवाग्यतोजुहुयाद्धविः॥४१२॥कोद्रवंची

१६

णकं माषंमसूरंचकुलछकं। क्षारंचलवणंसर्वं वैश्वदेवेविवर्ज
येत्॥ गृहस्थकारकौ॥ भार्याभावेनुकल्पेनहोमायत्वग्निधारणं
वैश्वदेवानुकल्पस्य इष्टोदिविधानतः॥१५॥ होमोवाशाकलै
मंत्रैर्विप्रेर्होम्यस्यवार्पणं। आचम्यतुततःकुर्यात्प्राज्ञोद्वा
रावलोकनं। हंतकारमथाग्रंवाभिक्षांवाशक्तितोद्विजः॥
दद्यादतिथयेनित्यंबुध्येतपरमेश्वरं॥१७॥ ग्रासमात्रंभवे
द्भिक्षाअग्रंग्रासचतुष्टयं॥ अग्रंचतुर्गुणीकृत्यहंतकारो
विधीयते॥१८॥ दद्याच्चभिक्षात्रितयंपरिव्राड्ब्रह्मचारिणं॥
इच्छयाचततोदद्याद्विभवेसत्यवारितं॥१९॥ यत्फलंसो
मपानेनप्राप्नोतिधनवान्द्विजः॥ सम्यक्पंचमहायज्ञैर्द

रिद्धिस्तद्वाप्नुयात॥२०॥पंचयज्ञांस्तुयोमोहान्नकरोतिगृ
हाश्रमीतस्यनायंचनपरोलोकोभवतिधर्मतः॥२१॥अथ
भोजनंव्यासः॥पंचार्द्रोभोजनंकुर्यात्प्राङ्मुखोमौनमास्थि
तः॥हस्तौपादौतथैवास्यमेषुपंचार्द्रतामता॥२२॥उपलि
33 प्तेसमेस्थानेशुचौश्लक्ष्णासनान्विते॥पादाभ्यांधर
णींस्पृष्ट्वापादेनैकेनवापुनः॥२३॥सौवर्णेराजतेताम्रे
पद्मपत्रपलाशयोः॥भाजनेभोजनंकुर्वन्त्रिरात्रफल
मश्नुते॥२४॥एकएवतुयोभुंक्तेविमलेकांस्यभाजने॥
चत्वारितस्यवर्द्धंतेआयुःप्रज्ञायशोबलं॥२५॥ताम्रपा ॥३३॥
त्रेनभुंजीतभिन्नकांस्येमलान्विते।पालाशपद्मपत्रेषु

गृही भुक्तैं दवं चरेत ॥२६॥ ब्रह्मचारी यतीनां तु चांद्रायणफ
लं लभेत। तांबूलाभ्यंजनं चैव कांस्यपात्रे च भोजनं। यति
श्च ब्रह्मचारी च विधवा च विवर्जयेत ॥२७॥ व्यासः ॥ कृत्स्न
पात्रस्तु भुंजीत पंच ग्रासान्महामुने। शेषमुद्धृत्य भोक्त
व्यं पितृ अर्थं तु नचोद्धरेत् ॥२८॥ अन्नं दृष्ट्वा प्रणम्यादौ प्रांजलिः
कथयेत्ततः ॥ अस्माकं नित्यमस्त्वेतदिति भक्त्याथ वंदये
त् ॥२९॥ भोजनात्किंचिदन्नाग्रमुद्धृत्य बलिमाहरेत। भू
पतय इत्यादिभिः प्रेतेभ्यश्चेदमुच्चरेत ॥३०॥ यत्र क्वचन
संस्थानां क्षुत्तृष्णोपहतात्मनां। प्रेतानां तृप्तये ह्यक्षय्यमि
दमस्तु यथासुखं ॥३१॥ याज्ञवल्क्यः ॥ अपोशानेनोप

३५

रिष्टादधस्तादश्नातथा॥ अनग्नमन्नं तंचैवकार्यमन्नंद्विजातये॥३२॥
शौनकः॥स्वाहांताः प्रणवाद्याश्चनाम्ना मंत्राश्चवायवः। तर्जनीमध्य
मांगुष्ठलग्नाप्राणेंआहुतिर्भवेत॥३३॥मध्यमानामिकांगुष्ठैरपानेजु
हुयाद्धविः॥कनिष्ठानामिकांगुष्ठैर्व्यानेचजुहुयात्ततः॥३४॥त
र्जनींतुबहिःकृत्वाउदानेजुहुयात्पुनः॥समानसर्वहस्तेनस
मुद्रायाहुतिर्भवेत॥३५॥जिह्वयैवग्रसेदन्नंदशनैर्नस्पृशे
त्॥प्राणद्वयंपुरुषोश्नीयान्मध्येचकदिनाशनं॥३६॥अंत्येपुन
ईश्वरीतुबलारोग्यैर्नमुंचति॥अष्टौग्रासामुनेर्भक्ष्याःषोड
शारण्यवासिनः॥द्वात्रिंशत्तुगृहस्थस्यह्यमितंब्रह्मचारिणः॥
३७॥भोजनंतुननिःशेषंकुर्यात्प्राज्ञःकथंचन॥अन्यत्रद

६२

धिसक्काज्यपललक्षीरमधुपः॥३८॥सायंप्रातर्द्विजातीनाम

शनंश्रुतिचोदितं॥नांतराभोजनंकार्यमग्निहोत्रसमोवि

धिः॥३९॥यवीयान्नसपितायस्य भुक्तास्याद्विकभोजनंप्रा

णाग्निहोत्रादन्यत्रनासौमौनंसमाचरेत्॥४०॥स्नास्यतो

वरुणःशक्तिंजुह्वतोग्निःश्रियंहरेत्॥भुंजतोमृत्युरायुष्यंत

स्मान्मौनंत्रिषुस्मृतं॥तज्जीवत्पितृकव्यतिरिक्तविषयोपिदो

नास्ति॥लवणंव्यंजनंचैवघृततैलंतथैवच॥लेह्यंपेयंचवि

विधंहस्त ... दत्तंनभक्षयेत्॥४१॥उदकंयश्चपक्वान्नंयोद

व्याद्दातुमिच्छति॥सभ्रूणहासुरापश्चसस्तेनोगुरुतल्प

कः॥४२॥हस्तदत्तानिचान्नानिप्रत्यक्षंलवणंतथा॥मृत्ति

काभक्षणंचैवगोमांसाशनवत्स्मृतं॥४३॥उदक्यामपि

क्र।

ग।

चंडालं श्वानं कुक्कुटमेवच॥ भुंजानो यदि पश्येत्तु तदन्नं तु परित्य
जेत्॥४४॥ केशकीटावपन्नं च मुखमारुतवीजितं॥ अपन्नं तद्वा
क्षसं विद्यात्तस्मात्तत्परिवर्जयेत्॥४५॥ अथ्यासनोपविष्ट
स्य यो भुंक्ते प्रथमं द्विजः॥ बहूनां पश्यतां सोऽज्ञः पंक्त्या हर
ति किल्बिषं॥४६॥ गोभिलः॥ एकपंक्त्युपविष्टानां विप्राणां
35 सह भोजने॥ यद्येकोपि त्यजेत्पात्रं नाश्नीयुरितरे पुनः॥४७॥
न स्पृशेद्वामहस्तेन भुंजानो न कदाचन॥ न पादौ न शिरो ब
स्तिं न पदा भाजनं स्पृशेत्॥४८॥ यस्तु पाणितले भुंक्ते यश्च
फूत्कारसंयुतं॥ प्रसृतांगुलिभिर्यश्च तस्य गोमांसवच्च तत्॥
४९॥ नाजीर्णे भोजनं कुर्यात्कुर्यान्नातिबुभुक्षितः॥ नार्द्रवा ॥२५॥
सो नार्द्रशिरा देवालयगतोथवा॥५०॥ नप्रसारितपाद

स्रुपाद्दारोपि तपाणिमान्॥नवेष्टितशिराश्चापिनोत्संगकृ
तभाजनः॥५१॥ग्रासशेषनचाश्नीयात्पीतशेषंपिबेन्नच॥
शाकमूलफलेक्षूणांदंतछेदैर्नभक्षयेत॥५२॥बहूनांभुं
जतांमध्येनाश्नीयात्त्वरान्वितः॥वृथानविकिरेदन्नंनो
च्छिष्टंग्वचकचिद्व्रजेत॥५३॥नपिबेन्नचभुंजीतद्विजःसव्येन
पाणिना॥नैकहस्तेनचजलंशूद्रेणावर्जितंपिबेत॥पिबे
तायत्पतेत्तोयंभाजनेमुखनिःस्रुतं॥अभोज्यंतद्भवेदन्नं
भोक्ताभुंजीतकिल्बिषं॥पीतावशेषितंतोयंब्राह्मणोनपु
नःपिबेत॥पिबेद्यदिहितत्तोयंद्विजःश्चांद्रायणंचरेदि
ति॥कौर्मेनाई्रात्रेनमध्याह्नेनाजीर्णेनाईवस्त्रधृक्॥

नभिन्नभाजनेचैवनभूम्यांनचपाणिषु ॥ नोच्छिष्टोघृतमाद-
द्यान्नमूर्द्धानंस्पृशेदपि ॥ नब्रह्मकीर्त्तयन्वापिननिःशे-
षंनभार्यया ॥५८॥ श्रद्धभुक्तावशिष्टंतुनाद्याज्झांउस्थितं
त्वपि ॥ नगारेनचवाकाशेनचदेवालयेष्वपि ॥५९॥ ज्ञात
नपः ॥ उद्धृत्यवामवाहस्तेनयत्तोयंपिबतिद्विजः ॥ सुरा-
पानेनतत्तुल्यंमनुराहप्रजापतिः ॥६०॥ =पात्रैः ॥ तोयं
पाणिनखस्पृष्टंब्राह्मणोनपिबेत्क्वचित ॥ सुरापानेन
तत्तुल्यंब्राह्मणोमनुरब्रवीत ॥ याज्ञवल्क्यः ॥ संधिन्यं
निर्दशावत्सगोःपयःपरिवर्जयेत ॥ उष्ट्रमैकशफंस्त्रै-
णंमारण्यकमथाविकं ॥ द्वकहालनभ्रमणयावचक्रस्यो

६९

न्न्रखलस्यच॥ एतेष्वान्निनदोयावत्तावत्कालमभोजनं॥ चंडालपति
तोदक्यावाक्यंश्रुत्वाद्विजोत्तमः॥ भुंजीतग्रासमात्रंतुदिनमेकमभोजनं॥६३॥ अथैकपंक्त्यांनाश्नीयाद्ब्राह्मणैःस्वजनैरपि॥ को
द्विजानातिकिंकस्यप्रछन्नंपातकंभवेत्॥६४॥ एकपंक्त्युपविष्टानांदुष्कृतंयद्दुरात्मनं। सर्वेषांतत्समंतावद्यावत्पंक्तिर्न
भिद्यते॥६५॥ अग्निनाभस्मनाचैवस्तंभेनसलिलेनवाद्वारेणैवचमार्गेणपंक्तिभेदोबुधैःस्मृतः॥६६॥ योवेष्टितशिरा
भुंक्तेयोभुंक्तेदक्षिणामुखः॥ वामपादकरःस्थित्वातद्वैरक्षांसिभुंज तेः॥६७॥ अथभोजनोत्तरांगानिलिख्यंते॥ भुक्त्वोच्छि
ष्टंसमादायसर्वस्मात्किंचिदाचमन्॥ उच्छिष्टभागधेयेभ्यः
सोदकंनिर्वपेद्भुवि॥६८॥ तत्रमंत्रः॥ रौरवेपुण्यनिलयेप

आर्बुदनिवासिनांउच्छिष्टोदकमिच्छूनांमह्यमुपतिष्ठतां॥
६९॥गंडूषस्याथसमयेतजन्यावक्रचालनं॥कुर्वीतयदि
मूढात्मारौरवेनरकेपतेत्॥७०॥तस्मिन्नाचमनंकुर्याद्यत्रभां
डेयभुक्तवान्॥यद्युत्तिष्ठतिनाचांतोभुक्तवानासनात्ततः॥
स्नानंसद्यःप्रकुर्वीतसोन्यथाप्रयतीभवेत्॥७१॥हस्तंप्र
साल्यगंडूषंयःपिबेद्विचक्षणः॥सदेवांश्चपितॄंश्चैवह्या
त्मानंचैवघातयेत्॥७२॥आचांतःपुनराचामेदायंगौरिति
मंत्रतः॥द्रुपदांवात्रिरावृत्यसर्वपापप्रणाशिनी॥७३॥प्रा
णानांग्रंथिरसीत्यालभ्येतहृदंततः॥आचम्यांगुष्ठमानी
यपादांगुष्ठेतुदक्षिणे॥७४॥निस्रावयेद्धस्तजलमूर्द्ध्वहस्तः
समाहितः॥कृतानुमंत्रणंकुर्याद्दिव्यनिरस्मीतिमंत्रतः॥७५॥

37

अष्टाक्षरेण स्वात्मानं योजयेद्ब्रह्मणेति हि॥ सर्वेषामेव या
गानामात्मयागः परस्मृतः॥७६॥ यो नेन विधिना कुर्यात्स या
ति ब्रह्मणः पदं॥ विष्णुरन्नात थैवान्नं परिणामश्च वै तथा॥७७॥
सत्येनैतेन वै भुक्तं जीर्यत्वन्नमिदं तथा॥ इत्युच्चार्य स्वहस्तेन
न पारिमृज्यात्तथोदरं॥७८॥ प्रतिः॥ आचांतो प्यशुचिस्ता
वद्यावत्पात्रमनुद्धृतं॥ उद्धृतेप्यशुचिस्तावद्यावन्नोत्मृज्य
ते महीं॥ भूमावपि हि लिप्तायां तावत्स्यादशुचिः पुमान्॥
नात्
आसनादुत्थितस्तस्माद्यावन्न स्पृशते महीं॥८०॥ अयो प्याच
म्य कर्तव्यं तत स्तांबूलभक्षणं॥ सुपूगं चसुपत्रं च चूर्णे
न च समन्वितं॥८१॥ अदत्त्वा द्विज देवेभ्यस्तांबूलं वर्जयेद्
बुधः॥ एकपूगं तु स्वारोग्यं द्विपूगं निष्फलं भवेत्॥८२॥

३८

अतिश्रेष्ठं त्रिपुरंच हाधिकं नैवदुष्यति॥ पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः॥ ८३॥ चूर्णपत्रं हरेदायुः शिराबुद्धिविनाशिनी॥ तस्माद्ग्रंच मूलंच शिरांचैव विशेषतः॥ चूर्णपर्णं वर्जयित्वा तांबूलं खादयेद्बुधः॥ ८४॥ अथ भोजनोत्तरकृत्यं॥ इतिहासपुराणाद्यैः षष्ठसप्तकौ नयेत्॥ अष्टमे लोकयात्रा तु बहिः संध्या उपासितः॥ ८५॥ यमः॥ रवेरस्तमया त्पूर्वं घटिकैका यदा भवेत्॥ सायंसंध्यामुपास्थाय कुर्या

मं द्धोचपूर्ववत्॥ ८६॥ अथ दीपकालः॥ रवेरस्तं समारभ्य यावत्सूर्योदयो भवेत्॥ यस्य तिष्ठेद्गृहे दीप स्तस्य नास्ति दरिद्रता॥ ८७॥ आयुर्दः प्राङ्मुखो दीपो धनदः स्यादुदङ्मुखः॥ प्रत्यङ्मुखो दुःखदो सौ हानिदो दक्षिणामुखः॥ ८८॥ संध्याः स्तार

38

करणेजमदग्निनाएकाहंचाप्यतिक्रम्यसंध्यावंदनकर्मच॥ अहो
३ रात्रोषितोभूत्वागायत्र्यायुतंजपेत्॥२०॥ द्विरात्रेद्विगुणंप्रो
त्रिरात्रे क्तंत्रिगुणंभवेत्॥ त्रिरात्रात्परतश्चैवस्याच्छूद्रएवनसंशयः॥२१॥
संध्याकालेत्वतिक्रांतेस्नात्वाचम्ययथाविधि॥ जपेदष्टशतंदे
वीततःसंध्यांसमाचरेत्॥२१॥ वसिष्ठस्तु॥ कालातिक्रमणे
चैव त्रिसंध्यमपिसर्वदा॥ चतुर्थ्यार्घ्यंप्रकुर्वीतभानोर्व्या
या५ हृतिसंपुटं॥२२॥ यमस्तु॥ प्राणांमत्रयंप्रातःसंगवेद्विगुणं
भवेत्॥ मध्याह्ने त्रिगुणंप्रोक्तमपराह्णेचतुर्गुणं॥२३॥ सा
यांह्ने पंचगुणकं॥ संध्यातिक्रमणेभवेत्॥ यद्वादीध्येतिवैमं
त्रंसप्तवारंजपेद्यदि॥ अकालेकुर्वतःकर्मकालेकारे
कृतंभवेत्॥२४॥ श्राद्धभोजनेगर्गः॥ दशाहत्वचःपिबेद

प१ ग्र१

३८ पोगाद्याश्राद्धमु द्विजः॥ततः संध्यामुपासीत शुद्धोञ्चतदनं
तरं॥२५॥अथस्वापः॥पूर्वरात्रे व्यतीतेनु सगच्छेद्गृतिमंदिरं॥
पादौप्रक्षालयेत्पूर्वं पश्चाछय्यांसमाविशेत्॥२६॥धौतवस्त्रं
चतांबूलं संयोगेच शुभावहं॥अथस्त्रीकृत्यं॥भर्तुःपादौ
नमस्कृत्य पश्चाछय्यांसमाविशेत॥संस्मृत्य परमात्मानं २५
39 पत्याज्ञेघे प्रसारयेत्॥योनिस्पृष्ट्वाजपेत्सक्तं विष्णुर्योनिं
प्रजापते॥२८॥रेतःसिंचेत्ततो योन्यां तस्माद्गर्भं बिभर्तिसा॥
याज्ञवल्क्यः॥षोडशर्तुर्निशास्त्रीणां तासुयुग्मासुसंविशे
त॥ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेत्॥२९॥यथा
कामीभवेद्वापिस्त्रीणांवरमनुस्मरन्॥कौर्मे॥सकालाभि उ
गामित्वं स्वदारेषुरतात्मनः॥पर्ववर्जं ग्रहस्थस्य ब्रह्मच

यमुदाहृतं॥५०॥स्त्रीणांतुप्रेक्षणास्पर्शाद्वास्यशृंगारभाषणा॥
त्॥स्यंदतेब्रह्मचर्यंचनदारेषुतुसंगमात्॥५१॥ऋतौनुग
र्त्रेशंकीत्वास्नानंमैथुनिनःस्मृतं॥अन्नतोनुयदागच्छेच्छौ
चंमूत्रपुरीषवत्॥५२॥सर्पापसर्पभद्रंतेदूरंगच्छमहावि
ष॥जनमेजयस्ययज्ञांतेआस्तीकवचनंस्मर॥५३॥आ
स्तीकवचनंस्मृत्वायःसर्पोननिवर्त्तते॥शतधाभिद्य
तेमूर्द्धाशिरिर्वजहतोयथा॥५४॥अगस्तिर्माधवश्चै
वमुचकुंदोमहामुनिः॥कपिलोमुनिरास्तीकःपंचैते
सुखशायिनः॥५५॥प्राक्शिरःशयनेविद्याद्धनमा
युश्चदक्षिणे॥पश्चिमेप्रबलाचिंताहानिमृत्युस्तथो
त्तरे॥५६॥स्यजविशेषेदिग्विशेषमाह॥स्वगृहेप्राक्शि

राः शेते स्वाश्रुर्ये दक्षिणाशिराः ॥ प्रत्यक्शिराः प्रवासे तु न कदा
चिदुदक्शिराः ॥ ५०७ ॥ शयने वर्ज्यस्थानान्याह ॥ मार्कंडेयः ॥ शून्या
लये श्मशाने च एकवृक्षे चतुष्पथे ॥ महादेवगृहे वापि मातृवेश्म
नि न स्वपेत् ॥ ५०८ ॥ न यक्षनागायतने स्कंदस्यायतने तथा ॥ कू
लच्छायासु च तथा शार्करालोष्ठपांसुषु ॥ ५०९ ॥ न स्वपेच्च तथा
दर्भैर्विना दीक्षां कथंचन ॥ धान्यगोधनविप्राणां गुरूणां च त
थोपरि ॥ ५१० ॥ नाकाशे सर्वतः शून्ये न च चैत्यद्रुमे तथा ॥ नि
षिद्धशाय्या ॥ न विशालां न वा भग्नां नास्तुप्तां मलिनां तथा ॥
न च जंतुमयीं शय्यामधितिष्ठेदनास्तृतां ॥ ११ ॥ मतदंतम
ये विद्युद्दग्धे मर्त्यः पलाशजे ॥ न शयीत द्रुतजं वृकारि भग्ने
कदाचन ॥ १२ ॥ प्रदोषपश्चिमौ यामौ वेदाभ्यासेन योजयेत् ॥

यामद्वयशयानस्य ब्रह्मभूयाय कल्पयेत॥१२॥ इति शयनवि
धिः॥ अकरणे प्रत्यवायः॥ कौर्मे॥ इत्येतदखिलं प्रोक्तमहन्यह ८२
३ ला निवै द्विजाः॥ ब्राह्मणानां कृत्यजातमपवर्गफलप्रदं॥१३॥ ना
स्तिक्यादथवालस्याद्ब्राह्मणो न करोति यः॥ स याति नरका
न्घोरान्काकयोनौ च जायते॥१४॥ नान्यो विमुक्तये पंथा
मुक्त्वाश्रमविधिं स्वकं॥ तस्मात्कर्माणि कुर्वीत तुष्टये च
कपालिनः॥१५॥ अथ स्वप्नफलं॥ सर्वेंद्रियव्युपरतौ मनोऽ
नुपरतं यदा॥ विषयेभ्यस्तदा स्वप्नं नानारूपं प्रपश्यति॥
१६॥ नदीसमुद्रतरणं माकाशतरणं तथा॥ भास्करोदयनं
चैव प्रज्वलंतं हुताशनं॥१७॥ ग्रहनक्षत्रताराणां चंद्रमंडल
दर्शनं॥ हर्म्यस्यारोहणं चैव प्रासादशिरसोऽपि वा॥

४१ ॥१८॥ एवमादीनि संदृष्ट्वा नरः सिद्धिमवाप्नुयात ॥ स्वप्नेतु मदि
स्व२ रापानं वसामांसस्य भक्षणं ॥१९॥ कृमि विष्ठानुलेपं च रुधि
रेणाभिषेचनं ॥ भोजनं दधिभक्तस्य श्वेतवस्त्रानुलेपनं ।
२०॥ रत्नान्याभरणादीनि स्वप्ने दृष्ट्वा प्रसिध्यति ॥२१॥ देवविप्र
द्विजधनं तु षंपंकजपार्थिवान् ॥ सुक्लपुष्पांबरधरान् प्रश
स्ताभरणं शनाः ॥२२॥ वृषभपर्वतंस्त्री शिफलिवृक्षाधिरो
हणं ॥ दर्पणामिषमाल्यापि स्मरणं च महांभसां ॥२३॥ दृष्ट्वा
४१ स्वप्ने र्थलाभस्यात् व्याधिमुक्तश्च जायते ॥ अथा विशेष
तः फलं ॥ यस्तु पश्यति वै स्वप्ने राजानं कुंजरं हयं ॥ सुवर्ण
वृषभं गां वा कुटुं तस्य वर्द्धते ॥२८॥ आरोहणं गोवृषकुंज
राणां प्रासाद शैलाग्र वनस्पतीनां ॥ विष्ठानुलेपो रुदितं
॥४१॥

मृतं च स्वप्ने षु गम्यागमनं धन्यं ॥२९॥ क्षीरिणं फलिनं वृक्षं मेका
कीयः प्रयछति । तत्र स्थः सा विध्येत धनं श्रीघ्रमवाप्नुयात् ॥३०॥
यस्य स्वप्ने तेन सर्पेण अस्यते दक्षिणः करः ॥ सहस्र लाभस्तस्य
स्याद पूर्णे दशमे दिने ॥३१॥ उरगो वृश्चिको वापि जलेयस्सति
येन नरं ॥ विजयं चार्थलाभं च पुत्रं तस्य विनिर्दशेत् ॥३२॥ प्रा
सादं शैलमारुह्या समुद्रं तरते नरः ॥ ३५ पिदासकुलेजातो रा
जा भवति वै ध्रुवं ॥३३॥ यस्तु मध्ये तडागस्य भुंक्ते च घृत पाय
सं ॥ ३५ पर्खंडे पुष्करे पत्रे तं विद्यात् पृथिवीपतिं ॥३४॥ बलाकां कु
क्कुटीं क्रौंचीं द्दष्ट्वा यः प्रतिबुध्यते ॥ कुलजां लभते कन्यां भा
र्यां सुप्रियवादिनी ॥३५॥ निगडै र्बध्यते यस्तु बाहुपाशेन वा
पुनः ॥ पुत्रो वा जायते तस्य धनं श्रीघ्रमवाप्नुयात् ॥३६॥ ३५ पा

४२

सनेशायनेयानेशरीरे वाहनेगृहे॥ ज्वलमाने विबुध्येत तस्य श्रीः
सर्वतोमुखी॥३७॥ आदित्यमंडलं स्वप्ने चंद्रं वा यदि पश्यति॥ व्या
धितो मुच्यते रोगाद्रोगी श्रियमाप्नुयात्॥३८॥ रुधिरं पिबति
स्वप्ने सुरां वा पितथा नरः॥ ब्राह्मणो लभते विद्यां मितरो लभ
ते धनं॥३९॥ शुक्लांबरधरा नारी शुक्ल गंधानुलेपना॥ उपव
गूहति यं स्वप्ने श्रियं तस्य विनिर्दिशेत्॥४०॥ पादुकोपानहौ
छत्रं लब्ध्वा यः प्रतिबुध्यते॥ उपसि वा निर्मलं तीक्ष्णां साधनं
तस्य निर्दिशेत्॥४१॥ रथं गोवृषसंयुक्तमेकाकी यः प्ररोहति।
तत्रस्थः स विबुध्येत धनं श्री घ्रमवाप्नुयात्॥४२॥ दधिलाभे
भवेदर्थो घृत लाभे ध्रुवं यशः॥ घृताशाने ध्रुवः क्लेशो यशा
स्तु दधिभक्षणे॥४३॥ उपांत्रैस्तु वेष्टितो यो वै नगरे पि गृहे पि वा।

42

गृहे मां उलिकोराजा नगरे पार्थिवो भवेत्॥४४॥मानुषाणि तु
मांसानि स्वप्ने तियस्तु पश्यति॥हरितानि तु पक्वानि स्यु एतत्
स्य चयस्फलं॥४५॥पद्मभक्षणे शतं लाभः सहस्रं बाहुभक्षणे॥
राज्यं शतसहस्रं वा भवेद्वै शीर्षभक्षणे॥४६॥सर्वा[illegible]णि शुक्ला
न्यपि शोभनानि कार्पास भस्मोदन तक्रयर्ज॥सर्वाणि कृष्णान्य
पि निंदितानि गोहस्तिवर्जं द्विजवाजिदेवं॥४७॥क्षीरं पिबति यः
स्वप्ने सफेनं दोहनेकृते। सोमपानं भवेत्तस्य भुक्त्वा भोगान
शेषतः॥४८॥दधि दृष्ट्वा भवेत्प्रीतिर्गोधूमांश्च धनागमः॥य
वान्यज्ञागमं विद्याल्लाभं सिद्धार्थकान्यपि॥४९॥नागपत्रं
भवेत्स्वप्ने कर्पूरमगरं तथा॥चंदनं पांडुरं पुष्पं तस्य श्रीः
सर्वतोमुखी॥५०॥सामान्यतोनिष्टफलो यथा॥यूपकिं

43

शुकवल्मीकपारिभद्राक्षिरोहणं॥ तैलकार्पाससिपिण्याकलोहा
वाप्निर्विनिर्दिशये॥५१॥ विवाहकरणे स्वप्ने रक्तस्त्रग्वस्त्रधारणं॥
स्तोतसाहरणं नेष्टं पक्वमांसस्य भोजनमिति॥५२॥ तदेवद्वि
विधस्यापि स्वप्नस्य दर्शनकालभेदेन फलेपि भेदः॥ स्वप्ना
ध्याये॥ स्वप्नास्तु प्रथमे यामे संवत्सरविपाकिनः॥ द्वितीये
चाष्टभिर्मासैस्त्रिभिर्मासैस्त्रियामकं॥५३॥ चतुर्थयामे यः
स्वप्नो मासेन फलदः स्मृतः॥ अरुणोदयवेलायां दशाहेन
फलं भवेत्॥ गोविसर्जनवेलायां सद्य एव फलं भवेत्॥५४॥
आदित्यं वाथ चंद्रं वा विगतच्छविकं तथा॥ पतंतं वाथ न
क्षत्रं तारकादीप्यवायदि॥ वीक्ष्येत मानवः स्वप्ने मरणं
शोकमवाप्नुयात्॥५५॥ अशोकं करवीरं वा पलाशं वाथ पु

षितं॥ स्वप्नांते यस्तु पश्येत नरः शोकमवाप्नुयात्॥५६॥
नावमारोहयेद्यस्तु नदीनां च समुत्तरे॥ प्रवासं निर्दिशे
त्तस्य शीघ्रं च पुनरागमं॥ रक्तांबरधरा नारी रक्तगंधा
नुलेपना॥ अवगूहति यं स्वप्ने मृत्युं तस्य विनिर्दिशे
त्॥५७॥ तैलेनाभ्यक्तकायस्तु पयसा च घृतेन वा॥
स्नेहेन वा तथान्येन व्याधिं तस्य विनिर्दिशेत्॥५८॥ के
शा यस्य विशीर्यंते यदि दंताः पतंति वा॥ अर्थनाशो
भवेत्तस्य पुत्रो वा यदि नश्यति॥६०॥ खरोष्ट्रमाहिष
रथमेकाकी यः प्ररोहति॥ तत्रस्थः स तु बुध्येत मृ
त्युं शीघ्रमवाप्नुयात्॥६१॥ कर्णनासाकराद्दीनां छे
दनं पंकमज्जनं॥ पतनं दंतकेशानां पक्कमांसस्य

भक्षणं॥६३॥खरोष्ट्रमाहिषं यानं तैलाभ्यंगं च मृत्यवे।
इति स्वप्ननिर्णयः॥ अथ स्वच्छारिष्टानि॥ अरुंधतीं
ध्रुवं चैव विष्णोस्त्रीणि पदानि च॥ आयुर्हीना न पश्यं
ति चतुर्थं मातृमंडलं॥६४॥ देहे प्यरुंधती जिह्वा ध्रु
वो नासाग्रमुच्यते॥ भ्रुवोर्मध्ये तु विष्णुपदं तारका मातृ
मंडलं॥६५॥ आकीर्णं श्रवणे यस्य न घोषं शृणुयान्न
यान्न भो मंदाकिनीं भिंदो छायां नेत्रेऽञ्जनायुषः॥६६॥
५५ पांसुपंकादिषु न्यस्तं खंडं यस्य पदं भवेत्॥ पुरतः
पृष्ठतो वापि सोऽष्टौ मासान्न जीवति॥६७॥ स्नानांबुलि
प्तगात्रस्य यस्यास्यं ज्ञाग्निः शुष्यति॥ गात्रेषार्द्रेषु स

मुनींदुचंद्रगते वैक्रमवत्सरात्॥ आचारसंग्रहः कृतो हरिहरेण शिवात्मजे॥१॥
माघस्य सितेपक्षे चतुर्थ्यां सोमवासरे॥ भवानीप्रीतये कृष्णो नारायणमुनेः कृते॥२॥ श्री

४५ वत्सरोर्द्धमासं न जीवति॥६८॥ अथ दुःस्वप्नशांतिमा
ह॥ शौनकः॥ एवमादिनिमित्तानि मृत्युकानि बहू
न्यपि स्वप्ने ख्यातानि चैतेषां कालरात्र्यधिदेवता॥६९॥
रात्रिसूक्तस्य कल्पोक्तं कुर्याद्वापि पूजनं॥ गृह्य
ज्ञविधानेन रात्रावेव समापयेत्॥ ब्राह्मणान्भोज
येच्छक्त्या सुशीलांश्चेदपारगान्॥७०॥ शांतिकर्म
ण्यशक्तस्तु जपेद्दुःस्वप्ननाशकान्॥ अथ स्वप्नस्य
यो मेधा नो ह्यद्यच पंचकं॥ प्रातरुत्थाय सुस्नातो मं
त्रान्समाहितः॥ तस्य वर्षशतायुष्यं भवत्येव न सं
शयः॥७१॥ इति संवत् १७८० विक्रमार्कसमयातीत शा
के १६०५ ज्येष्ठ शुक्ल पंचम्यां रविवासरे समाप्तः श्री॥

45

व्यावहारिकचक्रपाणिहरिहर
सुतस्येदंपुस्तकमाह्निकस्य॥

पाठकवैद्यनाथस्येदं
पुस्तकं पत्राणि ८५

७८